अनुमितिदीधितिविद्योत:

म० म० गोकुलनाथोपाध्याय विरचित:

सम्पादकौ

पं०श्री धर्मनाथ झा

पं०श्री रामसेवक झा

प्रकाशक:

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालय: ।

गोकुलनाथग्रन्थावल्यां

प्रथमं पुष्पम् ।

म० म० गोकुलनाथोपाध्यायविरचितो

अनुमितिदीधिति विद्योतः ।

गङ्गौलीग्रामवास्तव्य श्रोत्रिय पं०श्री धर्मनाथशर्म

दर्शनविभागाध्यक्ष पं०श्री रामसेवकशर्मभ्यां संशोध्य सम्पादितः ।

प्रकाशकः

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः ।

दरभङ्गा

प्रकाशन वर्षः—१९८२ ई०

प्रथम संस्करणम्—१०००

मूल्यम् ७/- (सप्त रूप्यकाणि)

★

प्रकाशकः

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः

कामेश्वरनगर, दरभङ्गा

मुद्रकः :—

रमण प्रेस

बंगलागढ़, दरभङ्गा

भूमिका

विदित मेवैतत्प्रेक्षावतां यदियमान्वीक्षिकी निखिलविद्योपजीव्यतां विभर्ति, यामुपजीवन्ति स्व स्वनिःश्रेयस साधनायेतरास्तिस्त्रस्मयीवार्ता दण्डनीतयो विद्याः।

प्रमाणादि षोड़शपदार्थनिरुपणपरस्य पञ्चाध्यायात्मकस्य न्यायशास्त्रस्य मुनीनांप्रवरेणाक्षपादेन प्रणीतस्य प्रमाणप्रकरणमेकांश मवलम्ब्य प्रमाणचतुष्टय व्यवस्थापनपरस्तत्वचिन्तामणिर्नाम महानिवन्धो युक्तिदीप्तिनिकरभास्वरो मैथिलेन महामहोपाध्यायेन गङ्गेशोपाध्यायेननिरमायि। यस्याः सर्वटीकातिशायनीं तर्ककर्कशविचारसम्भृतां दीधितिनाम्नीं टीकां वितेनिरे तार्किकशिरोमणयो रघुनाथभट्टाचार्य्याः। तां च दीधिति विद्योतारव्यया व्याख्यया समैदिधन् सकलविद्यास्थानकोविदा वैदेहा गौतमप्रतिमा महामहोपाध्याय गोकुलनाथोपाध्यायाः। अनुमितिसङ्गतिलक्षणनिरुपणपर्यन्तोऽयं दीधितिविद्योतो दीधितिनिगूढ़ार्थं विद्योतयन्नन्वर्थाभिधानतामञ्चति वहतिचालोककृत्सार्वभौममतयोरपि दोषाभावमावेदयन् सर्वतःसमुत्कर्षम्। सङ्गतिज्ञानं समेषामेव विचारकाणामत्यावश्यकम्। उक्तञ्च दीधितिविद्योतकृता—"अभिधानानन्तराभिधाने पूर्वोत्तरवाक्ययोःसङ्गति रपेक्षिता, अन्यथा नासङ्गतमभिदध्यादितिसमयमुल्लङ्ध्य व्यवहरतोवक्तुरुपेक्षणीयतापत्तेः। याज्ञेकर्मण्थपभ्रंशादिप्रयोगस्येव ग्रन्थमध्ये ऽसङ्गताभिधानस्यापकीर्तिद्वारा नरकसाधनत्वस्य सामयिकनिषेधेनाभिहितत्वादनिष्टसाधने ऽसङ्गताभिधाने प्रवर्तमानस्य भ्रान्तत्वेन तद्वचस्य नाश्वासात्, इति युक्तिव्रातव्रत निवेष्टितोऽयं दीधितिविद्योतो जिज्ञासूनां जिज्ञासानिवृत्तये भृशमुपादेयतां बिभर्ति।

दीधिति विद्योतकृत: खैष्टीं सप्तदशीं परार्धे अष्टादशीं च पूर्वार्धे शताब्दी माक्रम्य मिथिलामही नामग्राम मण्डलान्तर्गत मङ्गलवनी (मंगरौनी) नामग्राम ममण्डयन् । अन्ते च करुणाकूपारान् विद्वदग्रेसरान् प्रकाशनाशेषदोषाणां क्षमां विनयावनतो भूयो भूयोऽभ्यर्थ्य विरम्यते विस्तरात् ।

विदुषां वशंवद:
रामसेवक (झा) शर्मा
दर्शन विभागाध्यक्ष:
का० सिंह द० सं० विश्वविद्यालय:

॥ श्री गणेशाय नमः ॥

अथ अनुमिति प्रकरणम्

अथ दीधितिः

ओं नमः सर्वभूतानि विष्टम्य परितिष्ठते ।
अखण्डानन्द बोधाय पूर्णाय परमात्मने ॥१॥
अध्ययन भावनाभ्यां सारंनिणीय निखिल तन्त्राणाम् ।
दीधिति मधिचिन्तामणि तनुते तार्किक शिरोमणिः श्रीमान् ॥२॥
परजुष्टनयान्निवर्तमाना मननास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवे रपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥३॥
न्यायमतीते सर्वस्तनुते कुतुकान्निबन्ध मप्यत्र ।
अस्यतु किमपि रहस्यं केचन विज्ञातु मीशते सुधियः ॥४॥
मान्यान्प्रणम्य विहिताञ्जलिरेषभूयो
भूयो विधाय विनयं विनिवेदयामि ।
दुष्यंवचो मम परं निपुणं विभाव्य
भावावबोध विहितो न दूनोति दोषः ॥५॥

विद्योतः (गोकुलनाथी टीका)

ओं भूर्भुवः स्वरमृताय विपाककर्म
क्लेशाशयैरपरिमृष्ठ कलेवराय ।

अद्वैत बोध निधये पुरुषोत्तमाय
त्रैगुण्य शक्ति सचिवाय नमः शिवाय ॥१॥
विवेचयिष्यतोगूढ़ान् सिद्धान्तानधिदीधितिम् ।
मम गोकुलनाथस्य मतये भगवान्भवः ॥२॥
समीहित सिद्धये विहित मङ्गलं निबन्धाति ओमित्यादि ।

(गो० टी०) अकारोकार मकाराणां पदार्थतावच्छेदक ब्रह्मत्वादि— भेदात् द्वन्द्व एवाश्रयणीयः, नतु कर्मधारयः। विशेषणं विशेष्येण वहुलमित्यनु शासने— विशेषणपदस्वरसेन पूर्वपदप्रवृत्तिनिमित्तस्यापरपदार्थव्यावर्त्तकत्वे सत्येव कर्मधारयस्य साधुत्वात्, द्रव्यं पृथिवीत्यादिप्रयोगादर्शनादकारादिपदार्थतावच्छेदकं ब्रह्मत्वादि, ब्रह्मत्वञ्च स्रष्टृत्वं स्रष्टृ ब्रह्मपदयोः पर्यायपध्येपाठात् स्रष्टृ शब्दाच्च, सृजिधात्वर्थस्य सृष्टिसामान्योपधायकता संसर्गेण कृदर्थ कृतौवैशिष्ठ्यमवगाहमानोबोधआनुभविकः।

अतएव यत्किञ्चित्सृष्ट्युपधायककृतिमतो जीवस्य व्यावृत्तिः, विष्णुत्वमपि पालन सामान्यानुकूलप्रयत्नवत्वम्, पालनं तु जीवनमेव, तदपि प्राण शरीर-संयोगः, शरीरावच्छेदेन यः प्राणात्मनः संयोगः मुक्तात्मनां शरीरावच्छेदेन प्राणसंयोगः पुनरप्रामाणिकः। अनिष्टकारण विघटनमेव पालनमित्यपि वदन्ति। हरत्व मपि ध्वंससामान्यानकूल प्रयत्नवत्वम्। अकारादिपदार्थास्तु ब्रह्म विष्णु हरास्तादात्म्येन प्रणवपद समुदायार्थे भगवत्यन्वयन्ति, प्रणवसमुदाय शक्यतावच्छेदकन्तु भगवत्समवेतो विशेष विशेषः।

यत्तु ब्रह्मादि शरीरवृत्ति ब्रह्मत्वादि सामान्यान्येव लाघवादकारादि श-क्यतावच्छेदकानि ब्रह्मादिशरीराणामाहारपरिणामादिप्रयुक्त भेदाभावेऽपि कल्पभेदभिन्नेष्वेतेष्वनुगत ब्रह्मत्वादिजाति स्वीकारात्। हरि वामनादि शरीरेष्वनुगत विष्णुत्वादि सम्भवा च्च। अकारादिपदार्थे शरीराणां च विशेषवति भगवति प्रणव रूढ्यर्थे स्वावच्छिन्न प्रयत्नादि संसर्गेणान्वयः। व्याप्यवृत्तेरपि भगवत्प्रयत्नस्य ब्रह्मादिशरीर चेष्टाजनकत्वान्यथानुपपत्या तदवच्छिन्नत्वाङ्गीकारात्।

समवायेन चेष्टां प्रत्यवच्छेदकतया प्रयत्नस्य कारणत्वात्। प्रणव शब्दस्या-व्ययत्वेन तदर्थेऽकारादि प्रातिपदिकार्थस्य भेदेनाप्यन्वयबोधे व्युत्पत्ति विरोधा-भावात्। अतएव-त्रयीं तिस्रोवृत्तीस्त्रिभुवनमथो त्रीनपिसुरा नकाराद्यर्वर्णै स्त्रिभिरभिदधतीर्ण विकृति:। तुरीयन्तेधामध्वनिभिरवरुन्धान मणुभि:। समस्तं व्यस्तं त्वां शरणद गृणात्योमित्यत्राभिदधदिति प्रणव विशेषणम् सङ्गच्छते।

नहि सुरत्व मात्मनोधर्मो नवात्मनि त्रित्वं घटते। नच समस्तं व्यस्तं त्वां शरणदगृणा तीति वचनेन व्यस्तस्यापि प्रणवस्य शिवप्रतिपादकत्व कथन मसङ्गतं भवेदिति वाच्यम्। व्यस्तं सद्धर्य्यादिक मभिदधत्समस्तं त्वां गृणा तीत्येवं तत्र सम्बन्धाभ्युपगमात्।

शरीरशक्तस्य प्रणवावयवस्यात्मनि देवदत्तादि पदवन्निरुढलक्षणाया एव वा तत्र ग्रहणादिति, तच्चिन्त्यम्। ब्रह्मादिशरीरे शाल भञ्जिकायामिव चेष्टाप्रतीते र्भ्रमत्वेन भगवत्प्रयत्नस्य तदवच्छिन्नत्वे मानाभावात्, इन्द्रियान-धिष्ठान इव तत्र चेष्टानधिष्ठानेऽपि शरीरव्यवहारो मृदगविकादिवद्गौण एव सकलकल्प ब्रह्मशरीर सकल ब्रह्मावतारादि साधारणानुगत प्रतीत्य भावेन ब्रह्मत्व विष्णुत्वादि जातेरसिद्धे:। रामकृष्ण वामन नारायणादि साधारणैकजाति स्वीकारे पृथिवीत्व तेजस्त्व क्षत्रियत्वादिना सङ्करप्रसङ्गा च्चेति दिक।

यदि तु भार्गव वामन आङ्गिरस गौतम इत्यादि स्वारसिकप्रयोग दर्शना-दव्यावर्त्तकेपि विशेषणे कर्मधारय: साधु:, तदा प्रणवोऽपि भवतु तथा यद्पि वाक्यमेव प्रणवो नतु समासो मानाभावात्। छान्दसाना मैकपद्यव्यवहारस्तु समुदाय रुढिमत्ता निबन्धनो गौण: यादसां पतिर्वाराशिधिरित्यादौ वाक्येपि रुढिग्राहकसत्वेन समुदायशक्त्यभ्युपगमादिति जल्पम्, तन्न अकारा द्विभक्तिश्रवणापत्ते:, तस्य निपातत्वे त्वेका चो निपातस्योकारेण सन्ध्यनुपपत्ते:। सचायं लुप्तचतुर्थीक: परमात्मपदसमानाधिकरण:।

ननु प्रयत्नस्येच्छा समानाधिकरणत्वात् निरीहे भगवति न प्रयत्न सम्भव इत्यत आह- पूर्णायेति यत्पुरुष समवेतेच्छात्वं फलोपधानव्याप्यं तस्मै विषयित्व।

स्वाव्यवहित पूर्वत्वोभयसम्बन्धेन फलवतिभिन्नेच्छा शून्यत्वे सति इच्छावते इच्छेतरावृत्तिजन्या जन्यवृत्तीतर द्वित्वानधिकरणे इच्छावतेति यावत्। तथाचेच्छावतो भगवत:प्रयत्नो न वाधित इति भाव:। इच्छानियतं ज्ञानमप्यात्मनि वर्तत इत्याह—परमेति।

परमत्वन्तु नित्यजगद्गोचरज्ञानवत्वम्।

ननु ज्ञानेच्छाप्रयत्नात्मेतर समवेता इत्यात्मत्वमपि तत्र वर्त्तत इत्यत आह--आत्मन इति। सुखादि समवायिकारणतावच्छेदकतया सिद्धमात्मत्वं श्रौतात्मपुरुषादिपदप्रयोगे भगवत्यपि सिद्धयति। नित्यस्य स्वरुपयोग्यस्य फलावश्यंभावनियम इतिव्याप्तौ फलपदमुपादेय द्रव्यपरम्।

ननु नित्यद्रव्य परमाणुरित्युपक्रम्यैवाकरे तदभिधानात् कार्यमात्रंप्रति चा त्मत्वेन कारणतया धर्मिग्राहकमानसिद्धमेव भगव त्यात्मत्वम्, तदनादरे तु असमवेतप्रयत्ना भ्युपगमेनैव सामञ्जस्यात्, कापिलमत मनुप्रविष्टंस्यात्। भगवत्साधारणात्मत्व निराकरणन्तु पदार्थतत्वविवेकादौ भगवद्विद्वेषिणाम्मत माश्रित्यै वेति भाव:।

ननु तस्मि न्नात्मनि मानाभाव:। प्रयत्नेच्छा ज्ञानाना मसमवेतानामेव जगज्जनकत्व सम्भवादत: प्रमाणगर्भ विश्रेषणमाह सर्वेति। सर्वाणि भूतानि उत्पत्तिमन्ति, विष्टभ्य जनयित्वा परितिष्ठते। प्रमाणसिद्ध सत्ता काय परिणोपसर्गेण तिष्ठतेरर्थे सन्तायां प्रामाणिकत्व द्योतनात्। तथा च कार्य मात्रं प्रति आत्मत्वेन कारणतया सर्गाद्य द्वयणुकादि कार्यकर्तृत्वेनात्मनो भगवत: सिद्धि:।

प्रयत्नादि संसर्गेणात्मनोपि कार्यमात्रंप्रति जनकत्वादिति भाव:। पक्त्वा भुङ्क्त इत्यादौ क्त्वेन तुमुनादीनामिव क्त्वापि कर्तरिशक्ति:। पाककर्तृत्व विशिष्टे च भोजनकर्तृत्वान्वये समानकर्तृकत्वं क्रिययो रर्थसिद्धम्। तत्र शयितु पूर्वोगच्छति, पठन गच्छति, पश्यन् गच्छति इत्यादौ शयनस्योत्तरत्वेन पाठस्य समानकालीनत्वेन पाकस्य पूर्वकालीनत्वेन पक्त्वा भुङ्क्ते इत्यादौ भोजने पाकस्योत्तरत्वेन, मुखं व्यादाय स्वपीतीत्यादौ स्वापे मख व्यादानस्य तुल्यकालीनत्वे नाधीत्य तिष्ठतीत्यादौ अवस्थानेऽध्ययनस्य व्याप्यत्वेन तमेव विदित्वाऽति मृत्युमेतीत्यादा वतिमृत्यित्यनेन तद्वेदनस्य जन्यत्वेन संसर्गेणान्वय:।

विशिष्ट वैशिष्ट्यबोधे विधेयोद्देश्यतावच्छेदकयोः परस्परान्वयस्य व्युत्पन्न-त्वात् ।

तथा च प्रकृते जननव्याप्यास्थितिरेवं प्रतीयत इति नव्याः । पक्त्वा भुङ्क्ते नतु स्नात्वा इत्यत्र भोजने स्नानानन्तर्यस्य मुखं व्यादाय स्वपिति, नतु संवृत्येत्यत्र स्वापे मुखसंवरणकालीनत्वस्य अधीत्य तिष्ठति, नतु शयित्वे त्यत्रावस्थाने शयनव्याप्यत्वस्यैव भुङ्क्त्वैवाहं तृप्तो नतु पीत्वेत्यादौ तृप्तौ पानजन्यत्वस्याभावो नञा बोध्यते, यथा यथ मानन्तर्यादि क्त्वा प्रत्यय शक्य मानन्तर्यादेर्वृत्यनियामकतया तत्संसर्गावच्छिन्नाभावस्य नञा बोधयितु मशक्य-त्वात् ।

अन्यथा भावे क्त्वा प्रत्ययः समानकर्तृत्वानन्तर्यादि संसर्गतया भासतइति शाब्दिकमतमेव साधीयः स्यादिति वस्तुगतिः । यत्तु भूतपदं बाहियेन्द्रियग्राह्य विशेषगुणवदर्थकमेव विष्टम्भतेस्तु संयोगोऽर्थःप्रतियोगित्वंचद्वितीयायाः ग्रन्थकारमते च ईश्वरस्याकाशरूपतया स्वभिन्नसर्वभूतप्रतियोगिकः संयोगो न बाधितः । सर्वान् ब्राह्मणानति शेतेन्यास इत्यादौ सर्वपदेन क्रियाकर्तृ भिन्नस्यैव कर्मणः परामर्शात्प्रतियोगिनि स्वसमवेतत्वमात्रं वा द्वितीयार्थ इति तच्चिन्त्यम् । ईश्वरस्याकाशाभेदमते तत्र भूतसंयोगे मानाभावात्, तत्तद्द्रव्यानु योगिक समवायेन विजातीय संयोगे क्रिया व्यक्तेः समवायेन कारणत्वं स्वसमवेत जन्यभावत्वावच्छिन्नं प्रति जनकानामुत्तरदेशविशेषाणां सहकारित्वाभ्युपगमेन ईश्वरस्य तु कुत्रापि क्रियायाः सहकारित्वानभ्युपगमेन संयोगानुत्पादसंभवा त्तत्क्रिया जन्यतावच्छेदकं तत्संयोगप्रतियोगिक विशिष्टं रागव्यावृत्ताजातिः क्रियाव्यक्तेर्विजातीयसंयोगे शुद्धकालिकेनैव कारणतेत्यप्याहुः ।

अतएवोभय कर्मजन्यसंयोगे तत्तत्क्रियाकार्यतावच्छेदक जात्योः साङ्कर्य प्रसङ्ग भीतास्तान्त्रिकाः उभयकर्मजन्यतावच्छेदिकामन्यतर कार्यजन्यतावच्छेदक विरुद्धामुपाध्यवयवादिभेदावच्छिन्न नानासंयोगवृत्ति जातिमनुमन्यन्ते । यदि च स्वनाश्यप्रागभावादि संसर्गेण क्रियासामान्यस्य संयोगज संयोगव्यावृत्तजाति-विशेषावच्छिन्ने जनकत्वं तदा सुतरामीश्वरे संयोगा सम्भवः । क्रियानाश्य संयोग प्रागभावस्य तत्रासत्वात् । नच—भगवति शब्दासमवायिकारण संयोगा भ्युपगम आवश्यक इतिवाच्यम् । भावकार्यस्यसा समवायिकारणकत्व नियमस्य

शिरोमणिभिरनभ्युपगमादीश्वरव्यक्ते: शब्दंप्रत्यसमवायिकारणत्वे नैवाति प्रसङ्गाभावात्। अवच्छेदकतया निमित्तकारणस्य भेरीदण्ड संयोगादे; प्रतिनियमादेव शब्दस्यप्रादेशिकत्व कदाचित्कत्वोपपत्ति:। शब्दस्यकर्णावच्छिन्न समवायोपि कर्णाकाशयो रसंयोगेपिघटतएव। नहि कर्णसंयोगिवृत्तित्वमेव, कर्णावच्छिन्नत्वं, काशी शब्दस्यापि मैथिलैर्गहणप्रसङ्गात्। किन्तु स्वरूपसम्वन्धविशेषोअतिरिक्त एव वा, तत्वज्ञानमपि न भगवद्गोचर:। तेन भगवत्साक्षात्कारकारणमनस्त्वयोगसत्वेऽपि न तत्र प्रमाणमितिदिक्। सर्वं भूतानि ब्रह्माण्डानि विष्टभ्य धारयित्वाभूतानि-प्राणिनो विष्टभ्य भोगे योजयित्वेतिवार्थ इत्यपरे।

ननु सर्गाद्य व्द्यणुकादिकं प्रति जीवएव हेतुरस्तु किमीश्वरेणेत्यतो जीवव्यावर्त्तकं विशेषणमाहअखण्डेति। खण्डोदु:खसम्भिन्नआनन्द: खण्ड: सर्वाविषयको बोधोयेषां ते खण्डानन्दवोधस्तद्भिन्नायेत्यर्थ:। तथा च जीवानां वोधस्यखण्डतया तेनद्व्यणूकोपादानकेन द्व्यणुकोपादानदर्शित इति कथं व्द्यणुकादिकर्त्तार: स्युरितिभाव:। परेतु अखण्डौ ध्वंसाप्रतियोगिनावानन्दवोधौयस्य तस्मै इत्यर्थ:। ब्रह्मणि श्रुतिसिद्धस्यानन्दस्य मुख्ये बाधकाभावत् दु:खाभावस्वरुप गौणपदार्थत्वायोगात्।

नच धर्मजन्यतावच्छेदकस्यानन्दत्वस्या जन्यवृत्तित्वं न सम्भवतीति वाच्यम्। शरीरादिजन्यतावच्छेदक ज्ञानेच्छात्वादेरपि नित्यावृतित्व प्रसङ्गात्। वलवताप्रमाणेन प्रकृतेपिण्डज्ञानादौ शरीरजन्यतावच्छेदके जन्यत्व मुपादीयतामिति चेत्। किमनोवलवत्तरं प्रमाणम् यदाम्नायो नामे अप्रामाणिकम्, च सुख सामान्ये धर्मसामान्यजनकत्वम्, अश्वमेधादि जन्यतावच्छेदकजातीय धर्मविशेष हेतुतावश्यकत्वे नाकस्मिक सुरभिसमीरणादिसम्पर्कादिजन्मन: सुखस्य धर्मजन्यताग्राहकवेदाभावेन च नित्यानित्यवृत्ते: सुखत्वस्यताकार्य नवच्छेदकत्वान्। धर्मत्वजातिस्तुकर्मनाशा जलसंयोगादिनाश्यतावच्छेदकतयासिद्धा। नतु किञ्चित्कारणतावच्छेदकतया नचाश्वमेधत्वादिना विजातीयसुखे कारणत्व ध्रौव्ये धर्मत्वावान्तरजाति स्ताद्रूप्येण धर्मस्य सुखविशेषजनकत्वमप्रामाणिकमिति वाच्यम्। कीर्त्तनविशेषनाश्यतावच्छेदकतया अश्वमेधादि जन्यतावच्छेदकतया च धर्मत्वावान्तर जातिसिद्धे:।

नहि विहितक्रियात्वमनुगतोधर्मो येनधर्मसामान्ये जनकत्वंस्यात्। ननु यावतीषुक्रियाव्यक्तिषु अनुगतोयागत्वादिधर्मः प्रामाणिकः सिद्धयतु न पुनरश्वमेधादिजन्यतावच्छेदिका, कीर्त्तनञ्च न धर्मनाशकम्, कीर्त्तनत्वस्यानुगन्तु मशक्यत्वात्।

अपि तु कीर्त्तितव्यक्तिभेदाः क्रियानिष्ठफलजनकतायामेवप्रविष्टाः, कीर्त्तित कर्मजन्योधर्मस्तत्वज्ञानान्नश्यति, सामानाधिकरण्येनतत्वज्ञानवतो पूर्वस्यनाशे सामानाधिकरण्येनतत्वज्ञानस्य तादात्म्येनपूर्वस्योपधायकत्वसंसर्गावच्छिन्न प्रतियोगिताक शरीराभावस्य च कारणत्वात्। तेन न भोगजन्यापूर्वनाशे व्यभिचारः। नचापूर्वभिन्ने तत्वज्ञानिनो गुणे प्रतियोत्वेनापूर्वस्य नचारब्ध शरीरस्य तस्यनाशः। विनश्यदवस्थ शरीरे चरम भोगेषु तत्तच्छरीर नाशानन्तर मपूर्वनाशो नतु शरीरावच्छेदेनो त्पन्न भोगेनेति न तादृशस्थले शरीरस्य प्रतिबन्धकतायां व्यभिचारः।

भवतु वा भावनादृष्टादि साधारणजातीयनाशे नाश सामान्ये वा स्वप्रतियोगि जनकतया स्वप्रतियोगि कालिकाधिकरणतया वा संसर्गेण प्रागभाव; प्रतिबन्धकः। फलस्य तु सुखदुःखोभयजात्या तज्जातीयसाक्षात्कारत्वेन वा फलविशिष्टापूर्वनाशकत्वंम्। नतु चरमफलत्वेन गौरवात्। अजनित चरमफलमदृष्टं तु प्रागभावेन प्रतिबन्धादेव न नश्यतीतिदिक्।

तथा च अश्वमेधादिजन्यतावच्छेदकजातेरभावात्, फलप्रतिनियमनाय क्रियाणां विष्यिकारणत्वावस्यकत्वं धर्मत्वेनैव सुखसामान्ये जनकत्वमिति चेत्, एवं सति कीर्त्तित क्रियाजन्यापूर्व सहस्र कल्पना वैयर्थ्यात्। नच यागत्वादिना धर्मविशेषकारणतायामेव कीर्त्तितव्यक्तिभेदा निवेश्या इतिवाच्यम्। समूहालम्बनात्मकैक यागे किञ्चिदंशे कीर्तयिष्यमाणे द्वितीयांशेफलोपधायका पूर्वानुत्पत्ति प्रसङ्गात्। नचांशिकभेदः फलजनकतायामेव प्रवेश्यः, तत्रषण्डापूर्वकल्पन गौरवानवकाशात्। सर्वांशेकीर्त्तितव्यक्ति भेदापूर्वजनकतायामेव प्रवेश्याइति वाच्यम्। एवंसति द्वित्राद्यांशिक कीर्त्तितया तत्फलापत्तेः। प्रथम कीर्त्तित भिन्नस्य द्वितीयस्य द्वितीय कीर्त्तितभिन्नस्य प्रथमस्य चा पूर्वद्वारेण सत्वात्।

नच तावतां भेदानाम्एकैककारणताया मनुप्रवेशो युज्यते, परस्पर विशेष्य विशेषणभावेन गुरुतरानन्तकार्यकारणभावकल्पनप्रसङ्गात्। विजातीया-

पूर्वेऽश्वमेधत्वादिना कारणतायां तु प्रतिव्यक्तिभेदमेकैककारणताविरलकीर्त्ति-ताश्वमेधस्थले प्रथमान्नापूर्वप्रथमकीर्त्तितव्यक्तिभिन्नाश्वमेधाभावात् । न द्वितीयात् तद्भिन्नाश्वमेधस्य कार्यसहभूतस्याभावात् ।

एतेन विजातीयापूर्वे विलक्षण कर्मणां कारणत्वेऽपि समूहालम्वन क्रियातो वहूना मपूर्वाणां कल्पनात् तन्यत्वेन फलंप्रति जनकतायामेव कीर्त्तितव्यक्ति भेदानिवेशयि तु मुचिता, फलविशेषेषु अपूर्वाणां तेषु च क्रिया विशेषाणांकारणत्वे गौरवादिति प्रत्युक्तम् । एवमपि कीर्त्तिताश्वमेधात्फलापत्तेः । वस्तुतः कार्योपधायकसामग्रीकुक्षावपूर्वस्य न धर्मत्वेन प्रवेशो अश्वमेधजन्य धर्माद्वाजपेय-जन्यजातीयसुखापत्तेः नापि तत्क्रियाजन्यपूण्यत्वेन तेनरुपेणाजनकत्वात् । जनकत्वे वा वैजात्यविशेषेणैव तत्वमुचितम् ।

किञ्चाङ्ग जन्यतावच्छेदकतया कलिकापूर्वनिष्ठ वैजात्यमावश्यकम् , फलम्प्रति तेषांजनकत्वे प्रधानत्वापत्तेः । यागेरागादङ्गे वैधीतिन्यायात् प्रधानानामङ्गव्यत्यासेपि फलजननप्रसङ्गात् , कलिकापूर्वाणामपि न साक्षा-न्नानाविध दर्शपौर्णमासफलजनकत्वंशते फलेषु षण्णांकारणत्वे षट्कशतानि कार्यकारणभावानामापद्येरन्निति परमापूर्ववैजात्य विशेषेण तावत्फलेषु शतं परमापूर्वे च कलिकापूर्वाणां षट्कार्यकारणभावइत्यपि लाघवात् धर्मवैजात्यमा-वश्यकम् , अतो न धर्मस्य सुखसामान्यजनकत्वम् , इति न नित्युसुखवाधकमिति वदन्ति ।

स्वापकर्षबोधकप्रयोक्तु र्व्यापारो नम पदार्थः, तदन्वितमवधित्वञ्चतु र्थ्यर्थः । परमात्मावधिकमदपकर्षबोधको ममप्रयोक्तु र्व्यापार इत्यन्वयबो-ध इति । अध्ययनेति । निखिलानि यानि तन्त्राणि समानविषये मित्यन्तर विरोधीनि प्रत्यक्षाणीति यावत् तेषांसारं परीक्षा परिच्छेदं निर्णीय व्याख्याय चिन्ताया मननस्य मानं परीक्षा ग्रन्थमधिकृत्य दीधितिन्तनुते, तार्किकशिरो-मणिरित्यर्थः । एतेन रघुनाथशर्मा चिन्तामणेर्द्दीधिति मातनोति इति प्रतिज्ञा-तत्वान्मध्ये तदभिधान मनर्थकमिति समाहितम्, व्याख्यायामध्ययनस्य वाक्या-र्थ द्वारा भावनायास्तदप्रामाण्यशङ्का विधूननद्वारा करणत्वं श्रीमानिति रुपकं श्रीमान् सूर्यःसूर्योप्ययन द्वय मधिकृत्यताया मृदुतीव्ररुपाभ्या मवनाभ्यां निखि-

लानां तन्त्राणाभुवनानां सारंयौग्यम् पृथिव्यादित्रयं निर्णीय प्रकाश्यममणावर्क कान्ते दीधितिं तनुतेध्वनिः "पूर्ववाक्येन वाच्यस्य व्यङ्गस्यवाऽर्थस्योयपादकं च विशेषणम्" समाप्तपुनरात्तत्वेपि न दुष्यति, "अद्यापिस्तनवेपथुं जनयतिश्यामः प्रमाणाधिक" इत्यत्र समाप्तेपि प्रमाणाधिक इति विशेषणस्योपपादनात् ।

ननु प्रयोजनवत्त्वैवाभिधानाङ्गम्, नतुसङ्गतिः । प्रथमाभिधानानुपपत्तेः । यदि तु अभिधानानन्तराभिधाने पूर्वोत्तरवाक्यार्थयोःसंगतिरपेक्षिता, अन्यथा नासङ्गत मभिदध्या (चि०) प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं वहुवादि सम्मतत्वादुपमानात् प्रागनुमान निरुप्यते । (दी०) पूर्वापरग्रन्थैकवाक्यता प्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुनाननिरुपणं प्रतिजानीते प्रत्यक्ष वित्यादि ।

(गो० टी०) दितिसमय मुल्लङ्घ्य व्यवहरतो वक्तुरुपेक्षणीयतापत्तेः, याज्ञे-कर्मणि अपभ्रंशादि प्रयोगस्येव ग्रन्थमध्येऽसङ्गताभिधानस्यापकीर्तिद्वारानरक-साधनत्वस्य सामयिक निषेधे नाभिहितत्वादनिष्ट साधनेऽसङ्गताभिधाने प्रवर्त्त-मानस्य भ्रान्तत्वेन दद्वचस्यनाश्वासा दित्युच्यते, तदापि वस्तुगत्या प्रत्यक्षेण सङ्गतमनुमानमभिधानीय न्न सङ्गतिरप्यभिधानीयेत्यतआह— पूर्वापरेति । उत्तरग्रन्थे पूर्वग्रन्थैकवाक्यतो पतिपत्तयइत्यर्थः ।

एकवाक्यत्वं विभागसाकांक्षत्वं तच्च पूर्वग्रन्थो त्थाप्याकांक्षा निवर्त्तक ज्ञानजनक श्रवणविषयवाक्यत्वम् । भवति च पूर्वप्रत्यक्षग्रन्थोत्थापितायाः किमस्यकार्यमित्याकांक्षाया विषयसिद्धि मुद्रया निवर्तकस्य ज्ञानस्य जनकश्रवण-विषय उत्तरोऽनुमानग्रन्थः । यद्वाक्यं यद्वाक्यार्थोपजीवकार्थकं तत्तदुत्थापिता-कांक्षा निवर्तकज्ञानजनकश्रवणविषय इतिव्याप्त्या प्रत्यक्षोपजीवकत्वमनुमानग-तमभिहितम्, यदनुमाननिरुपणस्य प्रत्यक्षनिरुपणैकवाक्यत्व मनुमापयति, तादृशैकवाक्यताप्रतिपत्तिरनुमाननिरुपण शुश्रूषायामुपयुज्यते । तथा हि किमस्य कार्यमिति जिज्ञासायाः दुःखविशेष साधनतया द्विष्टत्वेनतत्साधने प्रत्यक्षकार्यविशेषज्ञानाभावेद्वेषस्तन्मूला प्रत्यक्षकार्यविशेषज्ञानगोचरेच्छा तादृशेष्टसाधनता ज्ञानमूला चानुमान निरुपणशुश्रूषा, सापि निसर्ग वलवद्-भिन्न विषयकानुमित्यादि सामग्रीतः श्रावणप्रत्यक्षसामग्र्या औपाधिक वलवत्व सम्पादकत्वेन श्रवणोपयोगिनीति नासङ्गतं सङ्गत्यभिधानमितिभावः ।

नन्वेवमपि प्रत्यक्षोपजीवकमनुमान न्निरुप्यतइत्येवाभिधातुमुचितम् । तावतैव प्रत्यक्षोपजीवकानुमानविषयक निरुपणत्वस्य प्रत्यक्षग्रन्थैकवाक्यता लिङ्गस्य लाभादितिकृतं पञ्चमी निर्द्देशेन, प्रत्यक्षनन्तर मित्यभिधानेन च नच पञ्चम्या ज्ञानजन्यजिज्ञासा प्रयोज्यत्वस्याभिधानात् , तस्य च प्रत्यक्षनिरुणानन्तरानुमाननिरुपणे ऽन्वयादानन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वस्वरुपं सङ्गतित्वमर्थत: प्रत्यक्षोपजीवकत्वेलभ्यत इतिसङ्गतित्व लाभाय तदुभयमितिवाच्यम् ।

सङ्गतौ सङ्गतित्वस्य वस्तुतोऽपेक्षणीयत्वेऽपि तज्ज्ञानस्यानुमानश्रवणादावनुपयोगादेवमाख्यातप्रयोगरुपा प्रतिज्ञाऽपिनि:फला वर्तमानकृते र्लडर्थस्यानुगमेऽपिक्षत्यभावादतआह— शिष्याणामिति ।

शिष्याणां सङ्गतिमभिदध्या न्नासङ्गतमितिशिक्षणीयानाम् अवधानायासङ्गतार्थक वाक्ये अभिष्ट साधनद्वारावगमाय, अयम्भाव: प्रत्यक्षोपजीवकत्वज्ञानजन्य जिज्ञासाप्रयोज्य प्रत्क्षनिरुपणानन्तरानुमाननिरुपणस्य तिङाकृतिसाध्यत्वावगमे प्रत्यक्षत्वादिविशेष परिहारेण तदीयसम्वन्धज्ञानजन्य जिज्ञासाप्रयोज्य तन्निरुपणानन्तरनिरुपणत्वावच्छेदेनापि लिङर्थो भासते । तेन च शिष्टाचारविषयत्वेन, वलवदनिष्टाननुवन्धित्व मुन्नीय सङ्गताभिधानेप्रवर्तते । प्रकृतानुपयोग्यर्थकानां पञ्चमीप्रत्यक्षानन्तर पदाख्यातानामुच्चारणस्य प्रयोजन जिज्ञासाया मितरत्र विशेषे निषेधेतात्पर्यमवधार्य तत्सम्वन्धज्ञानजन्य जिज्ञासाप्रयोज्येतर तन्निरुपणानन्तर निरुयणत्वावच्छेदेन अनिष्टानुबन्धित्वं बुद्धवासङ्गताभिधानान्निवर्तत इति मङ्गलोप निबन्धनस्य मङ्गलकर्त्तव्यत्वं शिक्षारुपत्वमिव सङ्गतित्वाभिधान प्रतिज्ञयोरपि शिष्याणा मसङ्गताभिधानाकर्तव्यता शिक्षारुपत्वेति दिक् ।

परे तु एकवाक्यत्वमर्थैक्यं प्रत्यक्षपरिच्छेद प्रयोजनीभूत नि:श्रेयस प्रयोजनकत्वमिति यावत् , तच्चेष्टसाधनताज्ञान पर्यवसितम् । गुरुवरामानुकूल शिष्य प्रवृत्तावुपयुज्यते । सिद्धे प्रत्यक्षनिरुपणे नि:श्रेयसार्थी अनुमाननिरुपणस्य वैकल्पिक नि:श्रेयसकारणत्वज्ञाना न्न प्रवर्त्तेत, अन्यत एव फलोपधान निश्चये अनुमानजन्यश्रमे वलवद्द्वेषस्यौत्सर्गिकत्वात् । अत: प्रत्यक्षानुमान निरुपणयोरेकप्रयोजनकत्व पर्यन्तानुशरणम् ।

तादृशमेकवाक्यत्वं च पूर्ववाक्यार्थ सङ्गतार्थक वाक्यत्वेनानुमेयंध्वननीयम्। वेति सङ्गतिप्रदर्शनफलत्वेन तदुपन्यासः, अवधान न्तु कृतिसाध्यताबुद्धिः, कर्माख्यातार्थस्य मयेत्यध्याहृततृतीयार्थस्य वा भावनाया धात्वर्थ विशेषणत्वेनान्वयस्य व्युत्पन्नत्वात्। प्रतिज्ञा फलमिति। यथासंख्यं फलफलिनोऽन्वयः। नच चकारवैयर्थ्यं च सन्ददर्शेत्यादाविव धातु सम्बन्धाधिकारीयस्य शतगुण प्रधान क्रिययोः समानकालीनत्व बोधनादेककर्तृक शब्दक्रिययोश्च भेदे तुल्यकालीनत्वा तम्भवात्। तत्सङ्गतिप्रदर्शन प्रतिज्ञयोरभेदावगमे तत्र चां स्भेदेन फलद्वयसम्बन्धे फलसमुच्चयोपपत्तेः।

प्रतिज्ञा पदार्थ स्तु प्रत्यक्ष मित्याद्याख्यातान्तं नतु आख्यात मात्रम्, अतएव प्रतिज्ञातेरर्थे प्रत्यक्ष वित्यादीत्यस्य तादत्म्येनान्वयोप्युपपद्यते, नच शत्रन्त प्रदर्शयतेरर्थे प्रदर्शनानुकूल व्यापारे तद्विशेषणम्। सञ्चारोरतिमंदिरावावधि इत्यादौ कृदन्तधात्वर्थ क्रियायामपि प्रातिपदिकार्था भेदान्वयबोधदर्शनादितिवाच्यम्। व्यवहितान्वय प्रसङ्गात्।

एवमपि सङ्गतिप्रदर्शनाभेदस्य शत्रा बोधितत्वे नाख्यात मात्रस्य प्रतिजातात्यर्थत्वाभावाच्च, यदि च निरुपणानुवचनमेवानर्थकमिति तत्प्रवर्तकं ज्ञानमपि तथेत्युच्यते, तदा भवतु सङ्गति प्रदर्शनेनानुमाननिरुपणश्रवणे निःश्रेयस हेतुत्वस्य प्रत्यक्षनिरुपणोत्थाप्याकांक्षानिवर्तक ज्ञानजनकत्वस्य वा प्रतिपादनं प्रत्यक्षोपजीवकत्व ज्ञानजन्यजिज्ञासा प्रयोज्यत्वरुप पञ्चम्यर्थ विशिष्टे प्रत्यक्षानन्तरानुमाननिरुपणे अवगते जिज्ञासाया श्च प्रत्यक्ष निरुपण प्रयोज्यत्वस्यानुमान निरुपणे तादृशजिज्ञासानिवर्तक शाब्दबोधजनक श्रावणविषयत्वस्यार्थत एव लाभात् एकवाक्यता प्रतिपत्तिरपि न स्वतः काम्येति, तस्याश्च फलमेव सङ्गतिप्रदर्शन फलत्वेनोक्तम्। शीष्याणामिति।

अत्रावधानं शुश्रूषा साच दर्शितदिशा प्रयुज्यत इत्याहुः, प्रत्यक्षवित्पादि, अत्र श्रोतोपस्थितस्य शब्दस्येति ना परामर्श इत्पर्थस्यतादात्म्येन प्रतिजानातेरर्थेऽन्वयः। अतएव प्रत्यक्षो शब्दस्य वृत्यार्थस्मारकत्वस्वरुपार्थवत्वाभावात प्रातिपदिकसंज्ञाभावेन न विभक्तिश्रवण मनर्थकस्यापीतिशब्दपरामर्शं वीजम्।

श्रौत्र प्रत्यक्ष मुपपादयि तुं केवलमुच्चारणम्। न च प्रत्यक्षशब्दोऽकारान्तो मूलेश्रूयते य उच्चरित इति ना परामृष्टः, प्रतिज्ञावाक्ये तादात्म्ये

नान्वियादतो विकृत एव शब्दोऽत्रानुदितः। प्रत्यक्षेत्यादि पाठंकल्पयन्नालोकः प्रामादिकएवेत्यभिमानः स आपाततः, तथा हि प्रत्यक्षोपस्थितस्येतिना परामर्शे प्रतिज्ञावाक्येऽनुकार्ये तत्वभेदो बाधित इत्यनुकरणस्यानुकार्ये वृत्तिरेव स्वीकार्या। विभक्तश्रवणं तु इतिनासह समासात, अतएव गवित्याहेत्येव प्रमाणम् नतु इति गवाहेति। अनुकरण शब्दस्याशक्तत्वेपि तदन्तर्भूतस्य कस्यचिच्छक्तस्य वर्णस्यानुकार्ये लक्षणाभ्युपेतव्येति। अविकृतानुकरणस्यापि विकृते लक्षणासम्भवाविकृतप्रतीक धारणेपि न कापि क्षतिः।

यदि पुनरनुकरणवृत्ति जातिसामान्यप्रत्यासत्या उपस्थितानुकार्यस्येतिना परामर्श सम्भवात्। किमनुकरणशब्दस्य वृत्तिस्वीकारेणेत्युच्यते, तदा प्रत्यक्षशब्दघटक चरमवर्णवृत्ति खुरत्व वर्णत्वादि सामान्यप्रत्यासत्योपस्थितस्यौकाररयापीतिकारेण परामर्शःसम्भवतीति प्रत्यक्षेत्यपि प्रतीकग्रहणं साध्वेव।

एवं च श्रोत्रोपस्थितशब्दस्य शाब्दबुद्धावनुप्रवेशः, शब्दविषयक वाक्यार्थवोधे शब्दस्योपस्थितेरेव हेतुत्वात्, पदजन्यत्वप्रवेशे गौरवात्। गवित्याहेत्यादौ श्रोत्रोपस्थिते गोशब्द इति ना कर्मत्व मभिधीयते। नारदइत्यवोधीति वदिति शाब्दिकमतेऽपि न प्रकृतेपिनिर्वाहः। अनुकार्य शब्दस्य श्रोत्रानुपस्थितित्वेन तस्येति पदार्थे तादात्म्यादिनाऽन्वयादिति दिक। अत्रेति प्रत्यक्षरित्यादिवाक्यमिदं पदस्यार्थः। सक्षादाक्षेपेण वा प्रतिपाद्यत्वम्। सप्तम्याः भावेऽन्वयः, तथा चैतद्वाक्येन साक्षात् (दी०) अत्रोपजीव्योपजीवकभावःफलतः स्वरुपतश्च प्रत्यक्षफलस्यानुमित्यनु व्यवसायादे रनुमित्युपजीवकत्वेऽपि न सर्वा प्रत्यक्षमितिस्तथा अनुमितयस्तु सर्वाः साक्षात्परम्परया वा व्याप्त्यादि प्रत्यक्षोपजीविका; पुरस्कृतेश्चाय मुपजीवकतोत्कर्षः।

(गो० टी०) प्रतिपाद्यमुपजीवकत्व माक्षेपेण प्रतिपाद्य मुपजीव्यत्वं फलयोः स्वरुपयोश्चेत्यर्थः। तथा च मूले प्रत्यक्षपदस्यानुमानपदस्य च फलकरणोभयोपस्थापकत्वेन फलान्तरं फलस्य स्वरुपानन्तरं स्वरुपस्य चकारात्स्वरुपानन्तरं फलस्य फलानन्तरं स्वरुपस्य निरुपणं प्रतिज्ञातमिति सर्वत्र सङ्गते रपेक्षणीयत्वात्पूर्वाण्युपजीवकत्वानि सङ्गति विधयोक्तानि तेन न न्यूनत्वमितिभावः।

ननु फले फलोपजीवकत्वं न सङ्गतिस्तत्प्रकारकज्ञानस्य जिज्ञासाद्वाराऽनन्तराभिधानप्रयोजत्वाभावा दन्यथा प्रत्यक्षफलस्यानुमानफलोपजीवकत्वेन

तज्ज्ञानजनित जिज्ञासाया ऽनुमाननिरुपणानन्तरमपि प्रत्यक्ष निरुपणापत्तेरतआह —प्रत्यक्षफलस्येति । यद्वा ननूत्तरग्रन्थे पूर्वग्रन्थैकवाक्यतानुमानायोपजीवकत्वं--

(दी०) यद्यपि सकलमेव प्रत्यक्षफलमुपजीव्यत्यदृष्टजननीं समय मत्कर्तव्यतादि परिच्छेदिकामनुमितिम्, ईश्वर प्रत्यक्षन्तु न फलम्, तथापि दृष्टद्वारकमिह तथात्वमादरणीयम्। इतरस्या विनिगम्यत्वात्। सर्वंचानुमितिकरण मिन्द्रियापेक्षोत्पत्तिकम् । अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्वाहक प्रत्यासत्ति विरहेणातत्वात्। दृष्टद्वारा वा तथात्वमादरणीयम्। न चोत्पत्तिमदपीन्द्रियं दृष्टद्वारक मनुमानमपेक्षते।

(गो० टी०) फलयो: सङ्गतिरभिहिता, तच्च यद्वाक्यं यद्वाक्यार्थ फलोपजीवक फलार्थकं तत्तदेकवाक्यमिति व्याप्तौ सत्यामेव घटते । न चेथं सम्भवति । प्रत्यक्षवाक्यस्यापि अनुमानवाक्यार्थ फलोपजीवकफलार्थकत्वेन तदेकवाक्यत्वाभावेन च व्यभिचारात्। एकवाक्यत्वं हि तदुत्थापिताकांक्षा निवृत्ति प्रयोजकत्वम् ।

न चानुमान वाक्योत्थापिताकांक्षा प्रत्यक्ष वाक्यार्थज्ञानेन निवर्त्तते, चिरातीतत्वादत आह —प्रत्यक्षेति । अथच ननूपजीवकत्वादिति पञ्चमीप्रतिपाद्य ज्ञाप्यत्वस्य प्रत्यक्षोपजीवकत्व व्यापकवृत्तिविशेषणतयैव साध्ये प्रत्यक्षनिरुणानन्तरनिरुपणीयत्वेऽन्वय:। हेतुपञ्चमीस्थले तथैवव्युत्पत्तेर्वक्ष्यमाणत्वात्।

प्रकृते च यत्प्रत्यक्षोपजीवकं तत्प्रत्यक्षानन्तर निरुपणीयमिति न विशेषतो व्याप्ति: दुर्ग्रहत्वात्। अन्यथा अनुमानत्वादित्येवप्रयुज्येत, किन्तु यद्यदुपजीवकं तत्तन्निरुपणानन्तर निरुप्यमिति सामान्यत: तथाचानुमानोपजीवके तदनन्तर मनिरुपिते प्रत्यक्षे व्यभिचार इत्यत आपाततो हेतुपञ्चमीमभ्युपेत्य समाधत्ते— प्रत्यक्षेति। किम्वा अत्रेति पूर्वापरग्रन्थेत्यनेन प्रक्रान्त पूर्वनिरुपणमुत्तरनिरुपणञ्चेदमापरामृष्यते ।

नियामकत्वं सप्तम्यर्थ: तथा च पूर्वनिरुपणे उपजीव्यत्व मुत्तरनिरुपणे उपजीवकत्व नियामकमित्यर्थ:। तत्र लिङ्गस्य कारणत्वे फलत: फलद्वारकमितरञ्च साक्षादेवोपजीवकत्वमुत्तरनिरुपणस्य नियामकं वाच्यम्। व्याप्तिस्तु सामान्यतो वाक्येत्यत्र व्यभिचार माशंक्याह - प्रत्यक्षफलस्येति । आदिना

अनिमित्युपमीतार्थगोचञ्चाशुषाञ्च पग्रह: प्रत्यक्षमिति ईश्वरप्रत्यक्षं नतथा न कस्यापि उपजीवकं सर्वेति । प्रत्यक्षात्व सामानाधिकरण्येन उपजीवकत्वाभावान्वय सूचनाय एतेन सर्वप्रत्यक्षेनोपजीवकत्वाभावान्वयो वाधान्नापि प्रत्यक्षात्व सामानाधिकरण्येन सर्वप्रत्यक्षावृत्युपजीवकत्वाभावोन्वेति ।

अप्रसिद्धेरितिसमाहितम् । अतएव प्रत्यक्षमिते रनुपजीविकाया एकत्वादेकवचनम् अनुमितय इत्यत्रवहुवादिनोपादानं च सङ्गच्छते ।

साक्षादिति प्रात्यक्षिकपरामर्शमूलकानुमितौ परम्परयेति शाब्दादिपरामर्शमूलकानुमितौ नत्वेतावतापि मूले हेतुपञ्चम्यनुपपन्ने वे त्यतआह—पुरस्कृतश्चायमिति । अयं प्रमितिविभाजकोपाधिव्यापकत्वस्वरुप उपजीवकताया उत्कर्ष: पुरस्कृतोमूलकृताऽनन्तराभिधानव्याप्यतावच्छेदकत्वेन तात्पर्यविषयीकृत: तथा च उपजीवकत्वपद मुपजीवकत्वे विशेषलाक्षणिकमिति न हेतुपञ्चम्यानुपपन्नेतिभाव: ।

ननु प्रमितिविभाजक उपाधिर्न प्रत्यक्षात्वं किन्तु जन्यप्रत्यक्षत्वमिति । तदवच्छिन्नमप्यनुमित्युपजीवकत्वं सम्भवत्येव, इत्पाशंकतेयद्यपीति । समय: शक्तिर्मत्कर्त्तव्यता मदीयेदानीन्तन कृतिसाध्यता तत्परिच्छेदिका तद्विषयिकां यत्र मनसा शक्ते र्मत्कर्त्तव्यता श्च परिच्छेद: तत्राप्यतीन्द्रिय पदार्थघटितानाञ्चेदानीं घटकस्य कस्यचिदनुमानं मूलमावश्यकमित्यभिमान: ।

स्यादेवं यदि जन्यप्रत्यक्षत्वं प्रमाणविभजकंस्यात्, न च तथा गौरवात् । अपि तु साक्षात्कारत्वं जातिरेवेत्यतआह—ईश्वरेति । नफलं न फलत्वेन प्रमाणलक्षणघटकमू । तथा च प्रमाणफलविधया विशेषणीभूताया: प्रमितेरेव विभजनीयतयाऽतिप्रसक्तं प्रत्यक्षात्वं न तद्विभाजकोपाधिरितिभाव: ।

दृष्टद्वारकं-दृष्टमात्रद्वारकम् अदृष्टाद्वारकमितियावत्, स्वजनकादृष्टाजनक प्रमाणफलनिरुपितं प्रमाणफलतावच्छेदकावच्छिन्नमुपजीवकत्वमेवप्रमाणफल निरुपणानन्तर प्रमाणफलनिरुपणे प्रयोजकमितिपर्यवसितमु ।

तत्र अदृष्टद्वारकत्व प्रवेशध्रौव्ये प्रमाणफलतावच्छेदकावच्छिन्नत्वं त्यज्यतामतआह—इतरस्येति । अदृष्टाद्वारकोपजीवकतामात्रस्यानुमित्यनु व्यवसा-

यादौ व्याभिचारादित्यर्थः । इतरस्यादृष्टद्वारकोपजीवकत्वस्याविनिगमकत्वात् । अनुमितावेव न प्रत्यक्षे इति विनिगमनाया अविषयित्वादिति तु न व्याख्येयम् ।

यद्यपीत्यादिना गतार्थत्वान्निरुपणीयतावच्छेदक प्रमाणत्वावान्तरधर्मत्व मानत्वाद्यवच्छिन्नोपजीवकता स्वरुपयोः सङ्गतिः अन्यथा प्रत्यक्षास्यचक्षुरादेः परम्परयाऽनुमानोपजीवकत्वेन व्यभिचारप्रसङ्गा दित्याशयेनाह—सर्वञ्चेति । अनुमितिकरणम् अनुमितित्वावच्छिन्न कार्यतानिरुपित करणता विशिष्टं तेन मनसोऽनुमितिकरणस्य प्रत्यक्षानुपजीवकत्वेऽपि न क्षतिः । निरुक्तानुमित्यसाधारणकारणत्व स्वरुपस्यानुमानत्वस्य मनसः वृत्तेः अपेक्षोत्पत्तिः सत्ता प्रयुक्तोत्पत्तिः, सैवोपजीवतेरर्थः ।

अतएव धात्वर्थैकदेशसत्ताधिकरणतया उपजीव्यस्य कर्मत्वं तथाचप्रत्यक्षमुपजीवतीत्यत्र प्रत्यक्षसत्ता प्रयुक्तो मदिति वाक्यार्थः । अनुमितिम्इति ईश्वरज्ञानस्य द्वेधानुमितिकरणत्वं कार्यमात्रं प्रति उपादानप्रत्यक्षत्वेन अनुमितौ च परामर्शत्व व्याप्तिज्ञानत्वादिना नचैतावताप्यनुमानपद प्रवृत्ति निमित्त मनुमित्यसाधारण करणत्वम् । तत्र वर्तते तद्धि अनुमितित्वावच्छिन्न कार्यतानिरुपित कारणतावच्छेदक धर्मवत्वे सति तत्कार्यतावच्छेदक संसर्गेणानुमित्यधिकरणे अनुमितिजनक व्यापाराव्यवहित पूर्वसमयावच्छेदेन तत्कारणतावच्छेदक सम्बन्धेन विद्यमानत्वम् ।

अत एव मनसिऽजनितफले कालिकादिनावा जनित व्यधिकरणफले परामर्शस्वरुपे वा व्याप्तिज्ञाने नानुमानव्यवहारः । एवं चे श्वर व्याप्तिज्ञानस्याजन्यत्वेऽपि अनुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं नानुपपन्नम् । तत्करणता निर्वाहिकाया तद्घटिकायाः प्रत्यासत्तेः फलोपधानस्याभावेन तस्यानुमित्यकरणत्वादितिभावः ।

परे तु प्रमित्यसाधारण करणतावच्छेदक धर्मावच्छेदेनोपजीवकत्वमपि सङ्गतिः, तच्च न व्याप्तिज्ञानत्वमात्रम्, अपि तु जन्यत्वविशेषितम् । अन्यथा नित्यस्य स्वरुपयोग्यस्य फलावश्यंभावनियमात् । ईश्वरस्यानुमित्यापत्तेः ।

एवं चानुमितिं भावयत उत्पादयत: उपादानप्रत्यक्षमुद्रया जनयतोपीश्वर ज्ञानस्य कारणतानिर्वाहक प्रत्यासत्ते:, तदवच्छेदकधर्मस्याभावेना कारणत्वादित्यर्थ: ।

अथ करणता निर्वाहक प्रत्यासत्ति: व्याप्तिघटकरुपार्थ परस्पर वैशिष्टयावगाहिबुद्धित्वं तच्चेश्वरज्ञान व्यावृत्तमेव विसृंखलविषयताक ज्ञानेनैव ईश्वर सार्वज्ञोपपत्ते रित्यभिप्रायेणेद मित्याहु: । तच्चिन्त्यम् । सर्वञ्चानुमितिकरण मिति ग्रन्थश्वरसेन करणत्वावच्छेदेनोपजीवकतायामेव लाभात् । प्रत्यासत्यभिधानष्य व्यर्थत्वापत्तेश्च, सर्वं पुनरिति इन्द्रियत्वसामानाधिकरण्येनानु मानाधीनजनकत्वाभावएव वाक्यार्थ: । सर्वंपदेन सामानाधिकरण्येनान्वये तात्पर्य मवसीयते । अनुमानस्य तत्सत्ताया अधीना उत्पत्तिरप्युप जीवत्यर्थनिर्वचनम् । नानार्थस्योप जीवते: क्वचित्सहकारित्वादिक मप्यर्थ इतिव्यावृत्तयेपर्यायान्तरेणाभिधानम् ।

ननु चक्षुर्मनसो नैककारणता येन प्रमाणत्वावान्तर तद्धर्मावच्छेदेनानुमानोपजीवकतावाधितास्यात् । किन्तु चक्षुरादि प्रत्येक परिसमाप्ता, तदवच्छेदेनानुमानोपजीवकत्व मक्षतमेव, किञ्च फलोपधान पर्यन्तं न ल्युडादि प्रवृत्तिनिमित्तम्, गौरवात् । इतीश्वरज्ञान साधारणानुमानत्वावच्छेदेन प्रत्यक्षोपजीवकता न सम्भवतीत्यत आह—दृष्टद्वारावेति ।

अत्र कल्पे प्रमाण विभाजकोपाध्यवच्छिन्नत्वमुपजीवकतायां न प्रवेश्यते । उपजीवकत्वंच साक्षाज्जन्यत्वमन्ततो मनोरुप प्रत्यक्षजन्यत्वमनुमानेऽव्याहतम्, दृष्टद्वारकत्व मदृष्टाजनकत्वमुपजीव्य प्रमाण विशेषणम् । तेनेश्वर ज्ञानात्मकानुमान जन्यत्वेऽपि जन्योन्द्रियाणां नक्षति: ।

यत्तु उपजीवकत्व मिहापिकल्पे प्रयोज्यत्वमपि तन्न खण्डचक्षु: प्रयोजक घर्पण कर्त्तव्यार्थम् । इत्युप जीवकताया अदृष्ट द्वारिकायापि प्रत्यक्षत्व सामानाधिकरण्येन सम्भवादिति ।

(दी०) अथोपजीव्यं निरुप्यैवोपजीवकं निरुप्य तइति न नियम: । क्वचित् कार्यं निरुप्यापि कारणनिरुपणादितिचेत् किं चात: नहि सङ्गतिरनन्तराभिधानव्याप्ता । आनन्तर्याभिधानप्रयोजक जिज्ञासाजनकज्ञानविषयो ह्यर्थ: सङ्गति:, जायते च कार्यं करणे वा ज्ञाते कारणत्वस्यकार्यत्वस्य वा ज्ञानात्

किमस्य कारणं कार्यं वेतिजिज्ञासा अतस्तयो र्द्वयोरपि सङ्गतित्व मिथ्यञ्चोपजीवकतायास्तुल्यत्वऽपि न क्षतिरितिमन्तव्यम् ।

(गो० टी०) न च लवभूतव्याप्तिज्ञानसाक्षाज्जन्यत्वमपि चक्षुरादीनां दुर्वारमिति वाच्यम् । क्रियामात्रस्य कालोपाधित्वाभ्युपगमात्प्रतिलवमदृष्टोत्पत्या ऽदृष्टाजनकत्वेव तद्वारणाच्च अदृष्टाजनकत्वंश्रोत्रमेव प्रसिद्धम् । तज्जन्यत्वं श्रोत्रव्याप्तिज्ञानएव सुलभ इतिदिक् । अथास्य प्रत्यक्षोपजीवकत्वादिति मूलग्रन्थस्य सङ्गतेव नभिधान व्याप्यत्वेन धूमादित्यादाविव हेतुपञ्चम्यन्तत्वं प्राचीनानुमतं यथा कथञ्चिदुपपाद्य अन्यथा व्याख्यातुमुपक्रममाणमासङ्कते—अथेति । एवकारोभिन्नक्रम: । यत् यदुपजीवकं भवति तदुपजीव्यंनिरुप्य एवेति नियम: क्वचिदिति कस्यचित्कार्यस्य कारणं निरुप्य संयागे निरुपणादित्पर्थ: । तथा च दण्डकार्यस्य घटस्य दण्डनिरुपणानन्तरमनिरुपणाद्व्यभिचारात् , उत्तर वाक्यार्थ उपजीबकतायामुपजीव्यतायां च निरुपणीयतावच्छेदक प्रमितिविभाजकोपाध्यवच्छिन्न विशेषणे चा प्रयोजकत्वादि: दुर्वार इतिभाव: । किञ्चात इति प्रकृतेर्हीयते इति विशेष: । पञ्चमी नोपपद्यत इतिचेत ज्ञानप्रयोजकतार्थकताया: पञ्चम्या वेदात्प्रवर्त्तत इत्यादौ दर्शनात् किमत्रानुपपन्नम् ।

न्यायप्रयोगस्थलेपि हेतो: साध्यव्याप्यत्वं तात्पर्यविशेषेसति प्रतीयते नचात्रसङ्गति रनन्तराभिधानव्याप्येत्यत्र मूलकृतस्तात्पर्य मित्याह—नहीति । ननु यद्यनन्तराभिधानव्याप्यत्वेन मूलतात्पर्यं तदानन्तराभिधान व्याप्यत्व स्वरुप सङ्गतित्वा न्नोपस्थित्या तद्गर्भसङ्गतार्थकत्वाज्ज्ञानादेकवाक्यतानुमितिरनुपपन्ने त्यतस्सङ्गतिन्निर्वक्ति, आनन्तर्येति ।

आनन्तर्येणाभिधानम् आनन्तर्याभिधानममिधानस्यानन्तर्यमित्यर्धं पिप्पल्यादिकौ वा अनन्तरमेवानन्तर्यं चातुर्वर्ण्यादिवत्स्वार्थे वा अभिधानानन्तरितमभिधानमिति यावत् । यदभिधानानन्तर यदभिधान प्रयोजक जिज्ञासाजनकज्ञानविषयोर्थ: सा तन्निरूपिता तन्निरूप्यासङ्गति:इत्थञ्च प्रत्यक्ष निरूपणानन्तरं यदनुमाननिरूपणं तत्तात्वादिस्थान विशेषात्मचेष्टाया:सा प्रयत्नात्म चिकीर्षाया: सा शब्दस्वरूपेष्ठ साधनताज्ञानात् शिष्यज्ञानेच्छा तु शिष्यज्ञानस्य विद्यमान शिष्यजिज्ञासानिवर्तकत्वज्ञानाज्जिज्ञासोपस्थिति किम शब्दस्योपजीवक प्रश्न-

वाक्याज्जिज्ञासाप्रकारधर्मवति किमः शक्तेः प्रश्नवाक्यं तु उत्तरवाक्योत्पत्तिपरं-परया उपयुज्यते, जिज्ञासानिबृत्ताविच्छा च जिज्ञासाद्वेषात्सच जिज्ञासाया दु:खानुबन्धितत्वेन साक्षात्कारात् साच विषयविधया जिज्ञासात् इति किमस्यो-पजीपकमिति शिष्यजिज्ञासा भवति आनन्तर्याभिधानप्रयोजिका, तज्जनक-प्रत्यक्ष कार्यस्मरणप्रकारे प्रत्यक्षोपजीवकत्वेन लक्षणसमन्वयो प्रश्नवाक्यं व्यव-हर्त्तव्यज्ञानसाध्यतया जिज्ञासा साक्षात्कार मपेक्षते ।

सविषय भूत जिज्ञासाजन्य इति भवत्यनन्तराविधान प्रयोजिका शिष्यजि-ज्ञासा इत्यपिवदन्ति । अत्र पूर्ववाक्यार्थे जिज्ञासुपुरुषभेदात्सङ्गतिलक्षणं भिद्यते, अतएव प्रत्यक्षनिरूपणानन्तरं कोगुणइति जिज्ञासया निरूपिते गुणे अनुमाने क्वचिद्गुणत्वमपि प्रसङ्गस्वरूपासङ्गतिर्भवति, किं प्रत्यक्षोपजीवक-मिति जिज्ञासया निरूपते विषयभेद उपपद्यते ।

तथा च यदभिधानानन्तर यदभिधानप्रयोजक यत्पुरुषजिज्ञासाजनकज्ञान-विषयोयोऽर्थ: स तं पुरुषंप्रति तयो:सङ्गतिरितिपर्यवस्यति । एवंच यत्प, रुषस-मवेत गुणादिजिज्ञासया नकिमपिनिरूपितम् , तज्जिज्ञासाविषयधर्मगुणत्वे तंप्रतिसङ्गतित्ववारणाय प्रयोजकान्तं जिज्ञासाविशेषणम् । अर्थवत् ।

एतेन अनादौसंसारे कस्यचित्पुंसो जिज्ञासयाप्रत्यक्षनिरूपणानन्तरं गुणादे-रनिरूपितत्वाद् गुणत्यमपि प्रत्यक्षनिरूपिता प्रसङ्गसङ्गतिर्भवत्येवेति जिज्ञासा-विषय धर्मत्वमात्रंसम्यक् । अलं प्रयोजकान्तेन, इत्पास्तम् ।

यत्तु जानातेरन्तर्भावितन्यस्तत्वेन जिज्ञापयिषैवात्र जिज्ञासा वक्तृपुरुणस-मवेता गृह्यते, नतु प्रतिपाद्यपुरुषसमवेता सु ज्ञानेक्षा तस्याऽसार्वत्रिकत्वात् । उपजीवकत्वे नोपजीवकेज्ञाते तज्ज्ञानेच्छाया ऽसम्भवादन्तरर्थगोचरेच्छायां स्वरूपसतो विषयस्यैव प्रतिबन्धकत्वादज्ञाते च ज्ञानस्याप्यगृहीतत्वेन तत्रेष्टसा-धनता ज्ञानादिच्छानुपपत्तो: ।

एतेनोपजीवक जिज्ञासया मुपजीपकज्ञानमेव कारणम् । नतूपजीवक-ज्ञानज्ञानं गौरवात् । अन्यत्र तदुद्देश्यकेच्छायां तज्ज्ञानस्य कारणत्वेपिज्ञान-गोचरेच्छायां विषयस्यैव स्वतःकारणत्वो पगमादिष्टसाधनताज्ञानजन्येच्छाया

ज्ञानविषयक ज्ञानापेक्षित्वेपि उपजीवकज्ञानाभावद्वेषयोनेरिच्छाया लाघवादुपजीवकज्ञानमात्रजन्यत्वोपगमात् ।

अतएव तादृशमुपजीवकज्ञानजनकतामादाय लक्षणसंगमनम् एतादृश जनकताविशेषोपादानादेव जिज्ञासाजनकेष्ट साधनताज्ञानविषयेष्टसाधनत्वादौ नातिप्रसङ्ग इत्यपास्तम् । एवमपि जिज्ञासाया निरूपणप्रयोजकत्वानुपपत्तेः ।

सत्युपजीवकज्ञाने तु तज्जिज्ञासानुदयाच्च ननु जिज्ञासापयिषा शिष्यज्ञानस्यासिद्धत्वज्ञानमपेक्षते, तदसिद्धत्वन्तु शिष्यजिज्ञासाविषयत्वेनानुमेयम् । जिज्ञासा तु प्रष्टु वाक्यगत किं शब्देत्वेनबोध्या, प्रष्टुवाक्य न्तु वाक्यार्थभूतजिज्ञासायाः साक्षात्कारेण, सच विषयीभूतया जिज्ञासया जन्यव इति भवत्यनन्तर निरूपण प्रयोजिकाजिज्ञासा ।

यद्वा जिज्ञासा दुःख विशेषयोः कार्यकारणभाव सप्रतिपाद्यमानो न जिज्ञासा द्वेष्टीति, न तद्विरोधिवाक्यार्थबोधं न तरां तदुपाय मुत्तरवाक्यम्, नतमां तन्निदानं प्रष्टिवाक्यंकामयतइति । न पृच्छेदेव जाते तज्जिज्ञासा दुःखयोः समूहालम्बन साक्षात्कारे मनसा तदुभयकार्यंकरणभावग्रहे तद्द्वेषोत्पादन द्वारा प्रष्णोत्तरवाक्यादीना मुत्पत्तिरिति ।

जिज्ञासा च ज्ञातेप्युपजीवके उपजीवकत्वावान्तर धर्मप्रकारकोपजीवकविशेष्यक ज्ञानत्वेन सम्भवत्येवेति च इदमपि जिज्ञासापर्यन्त प्रयोजकताया गुर्व्याः प्रवेशे प्रयोजनाभावत्, असार्वत्रिकत्वाच्च जिज्ञापयिषैवात्रप्रवेशयि तु मुचितेति तन्न एवंसति सर्वस्यानन्तर निरूपणस्य जिज्ञापयिषा प्रयोज्यत्वावश्यकत्वेन कस्याप्यसंगताभिधानत्वाभावप्रसंगात् ।

एतादृश सङ्गतिज्ञानस्यैकवाक्यतानाक्षेपकत्वात्, न चेष्टसाधनता पर्यवसितमेकवाक्यत्वंसङ्गत्यानुमेयमिति, साम्प्रतम् संगतार्थके प्येकप्रयोजनकत्वाभावदर्शनात् जिज्ञसागभासंगतौज्ञातायां तस्यां जिज्ञासायां पूर्वग्रन्थो त्थाप्योत्तरग्रन्थनिवर्त्तयोद्वयोरर्थतो लाभे नैकवाक्यतावगमस्य पूर्वंप्रतिपादितत्वात् ।

नन्वेवमपि यत्र प्रत्यक्षनिरूपणानन्तरकिमुपजीवक कोघट इतिजिज्ञासया अनुमानमात्रस्य निरूपणम्, तत्र घटत्वेतिव्याप्तिरितिचेत्, अर्थपदेनानन्तरा-

भिधानीय वृत्तित्वस्याभिहितत्वेन तद्वारणात्, अतएव किमुपजीवकमितिजिज्ञासयां यत्र गगनस्य निरूपणम्। तत्रोपजीवकत्वे प्यति व्याप्तिरपाकृता जिज्ञासाविषयकज्ञानत्वादावतिव्याप्तिवारणाय जनकज्ञानपर्यन्तोपादानम्।

नचैवं जिज्ञासाजनकज्ञानविषयेष्टसाधनत्वादावतिव्याप्तिरितिवाच्यम्, जिज्ञासावृत्तेरिच्छात्वावच्छिन्ना या द्वेषजन्यतावच्छेदकेच्छात्वावान्तर जात्यवच्छिन्नाया वा जन्यतायाःप्रवेशात्। यत्र विनश्यदवस्थ द्विष्टसाधनताज्ञाने नोपजीवकत्वावान्तर धर्मप्रकारकोपजीवकज्ञानाभावेद्वेषः तत्रोपजीवके विशेषजिज्ञासानुदयेन उपजीवकत्वप्रकारकज्ञानत्वेन तादृशविशेषजिज्ञासात्वाद्यवच्छिन्नं प्रति कारणत्वं कल्प्यते, इदमनु सन्धायैव।

भवति हि सामान्यतोज्ञाते विशेषजिज्ञासाइति पठन्ति, इष्टसाधनताज्ञानद्वेषयोः कार्यतावच्छेदकं तु परस्परविरुद्धं, वैजात्यद्वयं कारणद्वयसमावेशे पुनरिच्छाद्वयं भवत, वा स्वर्गादिगतफलत्वाख्य विषयतानिरूपितोपायनिष्ठोद्देश्यत्वाख्य विषयताकेच्छात्वं फलत्वाख्य विषयत्वानिरूपितोद्देश्यताकेच्छात्वं च क्रमादिष्टसाधनताज्ञानद्वेषयोर्जन्यतावच्छेदकं फलमुद्देश्यत्वं च पिण्डाय पुत्रमिच्छामित्यनुभव साक्षिकोविषयता विशेषः। तथा च प्रकृते फलानन्त भविने या ज्ञानोद्देश्यताकेच्छावच्छिन्नाजन्यता तन्निरूपितकारणताया प्रकारतयाऽवच्छेदकोधर्मः सङ्गतिरित्यर्थः।

नन्वेवमपि उपजीवकत्वावान्तरधर्मप्रकारकोपजीवकज्ञानाभावे द्विष्टसाधनताज्ञानेन विनश्यदवस्थेनजनित द्वेषासत्यप्युपजीवकत्वज्ञाने उपजीवकत्वावान्तरधर्मप्रकारक ज्ञानोपस्थित्यभावे विशेषजिज्ञासानुदयात्।

अन्यथा उपजीवकमितिज्ञानाभावेऽपि तादृशेच्छा सम्भवात्, फलान्तर्भावेन जिज्ञासांप्रत्युपजीवकत्वावान्तरधर्मप्रकारकत्वेन ज्ञानज्ञानस्यापिकारणत्वावश्यकत्वे तथाविध ज्ञानत्वादावतिप्रसङ्ग इतिचेत्, न एवमपि यद्धर्मावान्तर धर्मप्रकारकज्ञानज्ञात्वेन तादृशजिज्ञासाजनत्वं सधर्मो निरूप्यनिष्ठःसङ्गतिरिति निर्वचनस्यनिर्दोषत्वात्।

अत्रजिज्ञासा मद्वारीकृत्य जिज्ञासापाः प्रयोजकत्वं विवक्षितम्। तेन उपमाननिरूपणेप्यनुमानाभिधानप्रयोजक प्रत्यक्षोपजीवक जिज्ञासायाऽतिपरं-

परया प्रयोजकत्वेपि न प्रत्यक्षोपजीवकत्वमुपमाने सङ्गतिरिति ध्येयम्। (दी०) लाघवाया त्रैवोपमानस्य सङ्गतिंदर्शयति बहुवादीति। सुप्रसिद्धतया निरसनीयाल्पवादि विप्रतिपत्तिकत्वेन सुप्रतिपदतया चानुमान एव व्युत्पित्सोः प्रथमंजिज्ञासा नोपमानेऽप्रसिद्धत्वात् निरसनीयबहुवादि त्रिप्रतियत्तिकत्वेनातिदुरुहत्वाच्च। औत्सर्गिकीं रीतिमनुरुध्य चेदं तेन प्रथमं कस्यचित् दुरुहे जिज्ञासोदयेऽपि न क्षतिः। तथाचावसरसङ्गत्योपमाननिरुपणमितिभावः। यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे। शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकं सामान्यतोदृष्टमन्ततोऽदृष्टजनक प्रवृत्यौपयिकं चानुमानमपेक्षते निखिलमेवोपमानमितीहा प्युपजीवकत्वमेव सङ्गति रित्यपि केचित्।

सम्भवति चेह निरुपणयोरपि कार्यकारणभावः। अथ तत्पूर्वक मित्यादिसूत्रे प्रत्यक्षपूवकत्वेनानुमाननिरुपणात् तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शात्। अत्रापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरुपणात् तस्य च प्रत्यक्षनिरुपणाधीनत्वात्। एवमनुमानभिन्नत्वेवोपमान निरुपणमप्यनुमान निरुपणापेक्षमिति सङ्क्षेपः।

(गो० टी०) यद्यपि यद्धर्मविशिष्टे विशेषजिज्ञासाया जिज्ञासान्तर मद्वारीकृतत्यानन्तराभिधानप्रयोजकत्वं सधर्मो निरुप्यनिष्ठः संगतिरिति वक्तुं, शक्यते, तथापि वेदात्प्रवर्ततइत्यादौ ज्ञानप्रयोज्यत्वं नाम दृष्टचरः पञ्चम्यर्थो नतु जिज्ञास्य प्रयोज्यत्वमतः प्रत्यक्षोपजीवकत्वादिति पञ्चम्यत्वबोधाज्जनकज्ञान पर्यन्तानुधावनं यथा सन्निवेशे च नवैयर्थ्यमिति दिक्।

यद्धर्मावान्तर धर्मप्रकारक ज्ञानेष्टसाधनता ज्ञानत्वेन तादृशजिज्ञासाजनकत्वं सधर्मः सङ्गतिरित्यपि वदन्ति। अत्र जिज्ञासायां जिज्ञासाजनकज्ञाने वा पूर्वनिरुपण प्रयोज्यत्वमपिप्रवेश्यम्। तेन पूर्ववाक्य विच्छेद उद्बोधकान्तरजनित घटादिस्मरणमूलक जिज्ञासाया निरुपिते घटेन प्रसङ्गापि तत्रैकवाक्यत्वा सम्भवात्।

अत एवोपाधिस्मरणस्य व्याप्तिनिरुपण प्रयोज्यत्वोपपादनाय व्याप्तिनिरुपिता परस्परोपाधावुपदर्शयिष्यते। उपाधिज्ञानाव्यभिचारज्ञानेसति न व्या-

प्तिनिश्चय इति। अत एव चैकवाक्यतापि सङ्गत्या प्रतिपाद्यते। अत एव च कार्येकारणे वा ज्ञातेत्यनेन प्रत्यक्षपरिच्छेदप्रयोज्यत्वमेव कार्यस्मृत्यादावुपपाद्यते वेति। (चि०) तत्र व्याप्तिविशिष्ट पक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो नतु परामृश्यमानं लिङ्गमिति वक्ष्यते। (दी०) अत्र व्याप्तिविशिष्टत्व पक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः। कर्मधारयोन्तर भावप्रत्ययस्य पदार्थतावच्छेदकद्वय सामानाधिकरण्य वचनत्वात्। ज्ञानोप सन्धानेन च बाधिता बाधितसाधारण तज्ज्ञान लाभान्न भ्रान्तानुमितावव्याप्ति रित्याहु:।

(गो० टी०) इत्यनन्तर मेतादृश प्रश्न मूलभूततेतिशेष:। मिश्रानुसारिणस्तु पूर्वापर ग्रन्थैकवाक्यता प्रयोजका कांक्षाजनक ज्ञानविषयोर्थ:सङ्गस्तु एकवाक्यता, पूर्वग्रन्थ प्रयोज्याकांक्षानिवर्तक ज्ञानजनकत्वम् उतर ग्रन्थस्य तत्प्रयोजकत्वमाकांक्षायास्तेन पूर्वग्रन्थ प्रयोज्योत्तरग्रन्थ निवर्तनीयाकांक्षा लभ्यते आकांक्षा जिज्ञासा, तज्जनकज्ञानविषयत्वं च पूर्ववदेव निर्वाच्यम्। अत्रग्रन्थ: शब्दएव वाक्यम् नतु एकवाक्येपि।

(दी०) तन्न परामर्शेन नियमतो व्याप्तिवैशिष्टयादि सामानाधिकरण्यग्रहे मानाभावात् गौरवेण तद्विषयत्वेनाहेतुत्वात्। सम्बन्ध सम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्थले च तादृश सामानाधिकरण्या प्रसिद्धया तज्ज्ञाना सम्भवात् असतख्याति निरासात् अवान्तरवाक्यार्थयोग्यत्वनिर्णये वमहावायार्थज्ञानानुदयात् विषाणे शशसम्बन्धाभाव निश्चयदशायां शशविषाणजन्यमिदं कार्मुकमिति शाब्दबुद्धे र्ब्रह्मणापि दुरुपपादत्वात्।

नचात्र प्रमाण प्रस्तावात् प्रमैवलक्ष्या। यदि च सल्लिङ्ग मरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमापरमिति वाच्यम्। अव्याप्या पक्षधर्मयोस्तत्वादिना परामर्शेन जनितायां वस्तुत: साध्यवत्पक्षावगाहितयाप्रमायामव्याप्ते:। लिङ्गोपहित लैङ्गिकभाननिरासेनांशिक भ्रमत्वस्याप्ययोगात्। परमेश्वर तादृशज्ञानजन्यत्वस्य चाति प्रसञ्जकत्वात्। अतएव व्याप्तिविशिष्टे पक्षधर्मता तज्ज्ञानं वेत्यादिक मपास्तम्।

(गो० टी०) पदार्थयोरवान्तर सङ्गति स्वीकारान्तेन प्रत्यक्षानुमानोपमान शब्दा: प्रमाणानीत्युद्देशवाक्ये प्रत्यक्षानुमानयो: उपजीव्योपजीवकभाव: सङ्गतिरित्यपि सङ्गच्छते।

अतएव उद्देश एवैषा सङ्गति रित्यालोकइत्याहुः। एतादृशे सङ्गति लक्षणे दोषाभावेऽपिनेदं प्रत्यक्षोपजीवकत्वा दित्यादिमूलेन बोधयितुं शक्यते पञ्चम्या ज्ञानजन्यजिज्ञासानिवर्त्तकत्वार्थकत्वस्य कुत्राप्यदर्शनात् प्रत्यक्षानन्तर मित्यस्य वैयर्थ्यप्रसङ्गान्नहि प्रत्यक्षनिरुपण प्रयोज्यत्वार्थकं प्रत्यक्षानन्तरपदं नवा तदर्थस्य जिज्ञासाया मन्वयसम्भवात्, जिज्ञासाया रपदार्थत्वात्, पदार्थत्वेऽपि वा न नाम्ना पदार्थ संकीर्तनमुद्देशः सुबर्थे प्रातिपदिकान्वयोदृष्टइति निरुपितधातो रेवार्थे तदन्वयो युक्तःइत्याशयेन दीधितिकारो मौलस्वरससिद्धं सङ्गतिस्वरुपं वर्णयाम्बभूव।

तच्चिन्त्यम्, पञ्चम्याज्ञानजन्यजिज्ञासाप्रयोज्यत्वस्याप्यनुशासन सिद्धत्वाभावात्, बहुवादि सम्मतत्वादित्यादौ पञ्चम्यर्थान्तरस्यावश्यं कल्प्यत्वात्। ज्ञाने जिज्ञासायां निवृत्तौ च खण्डशक्तित्रयं प्रत्यक्षोपजीवकत्वादित्यत्र प्रकृत्यर्थो ज्ञाने तच्च जन्यतया जिज्ञासायां साच।

(दी) व्याप्ति विशिष्टश्च पक्षधर्मश्चेतिद्वन्द्वा श्रयणाद् व्याप्तिविशिष्टत्व पक्षधर्मत्वावगाहि ज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रे ऽन्यत्र च द्वन्द्वस्य दर्शनात्। पदार्थद्वयाभेद बोधकाच्च कर्मधारयाद्भेदाभेदोदासीन पदार्थद्वय बोधजनकत्वेनैव द्वन्द्वस्यभेदात्। विशिष्टपदस्य धर्मपरतया वा व्याप्तिवैशिष्टय पक्षधर्मत्व योर्लाभात्।

न चैव मालोको वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानजन्येऽतिप्रसङ्गः, एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित्। तदप्यसत्। एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वत वृत्तीति ज्ञानजन्येऽऽतिप्रसङ्गात्। एकरुपेण तदुभयावगाहित्वस्योक्तौ च मीमांसकमतानुप्रवेशात्। मिथस्तदुभयोपश्लेषाव गाहित्वस्य च परामर्शाव्यापकत्वात्। न च तदुभयविषयत्व नियतधर्मावच्छिन्नत्व कारणताप्रतियोगिक कार्यताशालित्वमर्थः, पक्षधर्मतापदोपादान वैयर्थ्यात्।

(दी०) व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात्। यद्यप्यत्रापीन्धन समानाधिकरणात्यन्ताभाव प्रतियोगितानवच्छेदक वह्नित्वावच्छिन्न समानाधिकरणेन्धनवानित्यादि परामर्शजन्येऽव्याप्ति

रखण्डव्याप्तेरप्रसिद्धेः, भ्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ सुतरां तथा, तथापि तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वं विवक्षितम्।

न च व्यतिरेकिण्यव्याप्तिः, व्यभिचारधी विरोधि धीविषयत्वे नान्वयव्यतिरेकव्याप्त्योरनुगमात्।

(गो० टी०) प्रतियोगितया निवृत्तौ साच निरूपयतेः फलीभूतेर्थे शाब्दबोधे प्रयोजकत्वेनान्वयेति, कर्माख्यातान्तेन धातुना व्यापारविशेषितस्य फलस्य प्राधान्येन बोधितत्वात्, गुणीभूतेपि फले द्वितीयार्थान्वय दर्शनाच्च प्रत्यक्षानन्तरपदार्थः प्रत्यक्षनिरूपणप्रयोज्यः। पञ्चम्यर्थज्ञाने जिज्ञासाया वा तादात्म्येनान्वेति, अर्थात् निरुक्तसङ्गतिलाभः। बहुवादीत्यादौ तु उपमान निरूपणात्

(दी०) भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगि वह्नि समानाधिकरण धूमत्वे वह्न्यभावव्यापकींभूताभावप्रतियोगित्वे वा गृहीते नियमतो व्यभिचारधीप्रतिरोधः। तथाविध धूमसमानाधिकरणत्वादिकं तु न तथा।

रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात्। व्यतिरेकसहचारेणान्वयव्यप्तिग्रहणाश्रयणा द्वा, नच भ्रमसंयोत्तरप्रत्यक्षंप्रति विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात्। अतएव लिङ्गवत्वादिलक्षणादिदेश वाक्यार्थज्ञान जन्योपमितौ नातिव्याप्तिः, तथाविध वाक्यार्थप्रतिसन्धानत्वेन तस्यहेतुत्वात्।

नचोपनयार्थज्ञानजन्य न्यायार्थज्ञाने तच्छब्देन सङ्केतित शब्दान्तरेण वा व्याप्त्यादि विशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः ? व्युत्पादयिष्यतेच महावाक्यार्थज्ञानस्यावान्तर वाक्यार्थधीजन्यत्वं तदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यम्, तत्रातिरिक्तस्यपदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशान्निश्चयत्वस्याप्रवेशाच्च।

नच तथापि तत्तद्विशिष्ट वैशिष्टयज्ञानंप्रति तत्तद्विशेषणतावच्छेदक प्रकारकनिश्चयत्वेन हेतुत्वात् तादृशे शाब्दबोधेप्रत्यक्षे चातिव्याप्तिः, दण्डो रक्तो न वेतिसंशये रक्तदण्डवानयमिति ज्ञानानुदयादितिवाच्यम्। ज्ञानीपरक्तेऽपि विशिष्ट विषयोपधानेनेच्छा चाक्षुषयोः कृतेश्च साक्षात्कारा द्विशेष्य विषयका-

द्विशिष्ट संस्कारादेव विशिष्टस्मरणाच्च। तद्विषयक गुणानां तत्र हेतुत्वे न्यूनवृत्तेर्ज्ञानित्वस्य तत्राप्रवेशादिच्छादित: संस्काराच्चानुमिते रनुदयात्, संस्का-राद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात्।

नच परामर्शानुव्यवसायेऽतिव्याप्ति:। सामान्यत: प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वम्। न तु यावानेव तत्तदितरत्वादिर्विषय निष्ठोधर्म: तेन तद्विषयत्वेन कार्यकारण-भाव:, मैत्रावलोकित चैत्रनिर्मित नीलेतरधट यद्विषयकत्वादिना तत्वेऽनन्तकार्य-कारणभावप्रसङ्गान्मानाभावादन्यथोपपत्तेश्च।

(गो० टी०) प्राक् कालीन: प्राक्पदार्थ:तादात्म्येन निवृत्तौ सा प्रतियोगि-तया जिज्ञासायां साच जनकताया वहुवादिसम्मतत्व प्रकारकज्ञाने तच्च विशे-ष्यतया अनुमानेभासत इत्युपमाननिरुपणात्पूर्वमनुमानजिज्ञासानिवृत्तिर्लभ्यते, इत्यवसर सङ्गतिलाभोपि सङ्गच्छते।

नच विभक्तिसमानाधिकरणं प्रातिपदिकं न भवतीति नियम:, विभक्तीनां-कर्त्रादिवाचकत्वपक्षे व्यभिचारात्, तस्मात्ज्ञानं जन्यजिज्ञासानिवृत्तिरेव पञ्चम्यर्थइति मिश्रोक्तकल्प एवाश्रयणीय:।

अन्यथा पञ्चमीद्वय स्वभिन्नार्थकत्वप्रसङ्गादिति विभावनीयम्। लाघ-वायेति। प्रत्यक्षोपजीवकत्वाविशेषादुपमानस्यैव प्रथम निरुपण शङ्का निरा-साय अनुमान जिज्ञापयिषा प्राथम्यात्प्रथमनिरुपणमित्यभिप्रायेणानुमान जिज्ञा-सा प्राथम्यवीज मिहावश्यमित्यभिधेयम्।

तेनैव सङ्गतावपि सूचितायां नोपमाननिरुपणारम्भे तदभिधानापेक्षा भव-तीतिभाव:। उपमाननिरुपणारम्भे अनुमानस्य वहुवादिसम्मतत्वादित्युक्तौ अनुमानस्येतिपदम् अधिकं—

(दी०) अथविशिष्टस्मरणेऽतिव्याप्ति:। न चोपेक्षान्यत्वेन तत्र हेतु-त्वम्, उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात् आंशिकत्वोपग-माच्च।

नापि प्रवृत्त्य निवृत्त्यजनकत्वमजिज्ञासितविषयत्वं वा तादृशादपि स्मृत्युत्पादात्। नापि संस्काराजनकत्वम्, तज्जनकतावच्छेदकरुपान्तरापरिचयात्, अन्योन्याश्रयप्रसङ्गात्, संस्कारानुत्पत्त्यैवास्मरण सम्भवे स्मृतिजनकतायां तदप्रवेशाच्च। नाप्यनुभवत्वं तथात्वम्, संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तर स्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात्। समूहालम्बनादितो नैकैकगोचर क्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद् दृढतरः संस्कारः।

परित्यज्य च निश्चिता व्यभिचारकं रुपं गृह्यमाणव्यभिचारक्रमेण कारणत्वकल्पना नुदयादिदमेव चान्यत्र सामान्यस्य च हेतुतावच्छेदकत्वे बीजम्। अभिहितं च तात्पर्यटीकायां प्रथमसूत्रेऽवयव विवेचनप्रस्तावे मिश्रः। स्मृतीनां स्वकार्यं संकारविरोधिनी नामसहभावादिति चेन्न, चरमज्ञानपदस्यानुभवपरत्वात्साक्षात्तज्जन्यत्वस्य वा विवक्षितत्वादित्यपि कश्चित्। किंच व्याप्यविशेष्यकात् पक्षविशेष्यकाच्च परामर्शादनुमितिदर्शनाच्च यदुभयवैशिष्टयावगाहि निश्चयत्वेन तत्र हेतुत्वम् लक्षणघटकमपि तदेव।

एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात्। अन्यथा नियमेन स्मृतेरुभय विशेष्यकत्व प्रसङ्गात् समानप्रकारत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र विशिष्यैव कार्यकारणभावः। नतूक्तरुपेण गौरवाद् मानाभावाच्चेत्यपि केचित्।

एवं च विशिष्ट वैशिष्टय बौधादौ क्वापि नातिप्रसङ्ग शङ्कापि। वह्न्याद्यनुमितौवह्न्यादिव्यभिचार धीविरोधि धीविषय धर्मप्रकारक पक्षधर्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात्। अतएव व्याप्यवत्पक्षाद्यभावग्रहंप्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः। व्याप्त्यविषयकत्वेन वा जन्यज्ञनं विशेषणीयम्। एतेन स्मृतिंप्रति संस्कारद्वारा, अनुभवंप्रति च साक्षाद्विशेषण धियो हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्वं विषय स्मृतेश्च कल्पनाद व्याप्यवत्वादिज्ञाने ऽतिव्याप्ति रित्यपि परास्तम्। साध्यादे रननुगमादेकोपादानेऽन्यानुमितौ दैवादव्याप्ति विषयिण्यां च तस्यामव्याप्तिः परमवशिष्यते। सापि तादृशज्ञानवृत्यनुभवत्वव्याप्य जातिमत्वविवक्षया निरसनीया। एतल्ला-

भायैव चानुभवार्थकं चरमज्ञान पदम् । एवञ्चान्वय व्यतिरेकव्याप्त्योः पृथक् प्रयोजकत्वेऽपि न क्षतिः । पर्वत वह्निव्याप्य वैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणता प्रतियोगिक कार्यताया वह्निव्याप्यवत्पर्वत निश्चयत्वावच्छिन्न कारणप्रतियोगिक व्याप्त्यविषयक वृत्ति कार्यताया वाऽवच्छेदिका या जाति स्तद्वत्वं वा वोध्यम् ।

व्याप्ति भानेऽवश्यं भासमानो यस्तादृशानुमित्य विषयस्तद विषयत्वमात्रं वा ग्राह्यम् । यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानु भावान्यासमवेत धर्मसमवायित्वमिति वा वक्तव्यम् ।

अनुभवत्वजात्यनङ्गीकारे तु तद्व्यक्तिसमवेत स्मरणासमवेतधर्मसमवायित्वं वक्तव्यम् । व्याप्तिज्ञानत्वावच्छिन्न कारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतावत्समानाधिकरणानुभवत्वव्याप्यजातिमत्वं तत्वमित्यपि कश्चित् ।

परे तु पक्षधर्मतेत्यत्र पक्षता विशेषणम् । तथा च पक्षतासहकृत तादृशपरामर्शजन्यत्वमर्थः, यथोक्ताया विशेष्याद्यभावरूपाया वा पक्षतातः प्रत्यक्ष वारणाय परामर्शस्योपादानं तत्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वं च विवक्षितं तेन वाधादिकालीनेन दैवात् प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालम्बने वा नातिप्रसङ्गः । तद् वृत्यनुभवत्वव्याप्य जातिमत्वविवक्षया च नाव्याप्तिरित्याहुः । तच्चिन्त्यम् ।

तत्करणमिति । नच व्याप्त्यादिज्ञानकरणत्वे नेतरभेद साधने व्याप्तिज्ञानत्वंतादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकम् । व्याप्तेरननुगमेऽप्यधिकस्य भागासिद्धिवारणमात्र प्रयोजनकत्वात् इतिवाच्यम्, फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात् । करणत्वनिष्ठव्याप्ते स्तादृश व्याप्तिज्ञानत्वत्वाद्यनवच्छेद्यत्वाद् व्यतिरेकव्याप्ते गमकतया —

(**गो० टी०**) भवतीत्यतोत्र लाघव मित्यपरे, प्रथमंप्रत्यक्षनिरूपणाव्यवधानेनानुमानएव जिज्ञासा जिज्ञापयिषा गुरोरितिशेषः । व्युत्पित्सो व्युत्पादयिषोः सुप्रसिद्धतया अभीष्टसाधन शिष्यप्रतिपत्तिकतया तथा च शिष्यसमवेते अनुमानज्ञाने स्वाभीष्टसाधनताग्रहा त्तत्रेच्छेतिभावः ।

ननु इदमुपमान साधारणमत आह– स्वप्रतिपदतयेति। बलवदनिष्ठान-नुबन्धिप्रतिपत्तकतयेत्यर्थः। तत्र हेतुर्निरसनीयेति। एवकारार्थमेवानुवदति नोपमानइति, अप्रसिद्धत्वादिति उपमानज्ञानस्यानुमानेऽ निरुपितेऽनुमान भिन्न-त्वानुमिति स्वरुपाभीष्टोपधायकत्वात्मिकायाः प्रसिद्धे रग्रे विरहादित्यर्थः।

यदि पुनरिष्ट स्वरुपयोग्यताज्ञानमात्रमिच्छाकारणमत स्तदानी मुपमान-ज्ञानस्येष्टोपधायकत्वाभावग्रहेपीच्छा सम्भवति इत्युच्यते तथासत्याह–दुरुहत्वा-दिति। बलवच्छ्रमानुबन्धिज्ञान कादित्यर्थः प्रतिबन्धकीभूत शिष्यजिज्ञासा-निवृत्तौ सत्यामवश्य वक्तव्यत्व मवसरः तत्र हेतुर्निरसनीयेति। बलवत्वश्रमे द्वेषविशेषः सचाननुगतकारणप्रयोज्य कदाचित्कइति मत्वाह–औत्सर्गिकी-मिति। कस्यचित् व्युत्पादयिषोः जिज्ञासोदये - जिज्ञापयिषोदये एतेनानुमान-त्वेनानुमान जिज्ञासा नानुमान निरुपणाङ्गम्। किन्तु किं प्रत्यक्षोपजीवकमिति साच प्रत्यक्षोपजीवकत्वेनोपमानमप्यवगाहत एव नचोपमानत्वावच्छेदेन दुरुह-त्वादिग्रहः तादृशेच्छाविरोधीत्यादि समाहितम्।

जिज्ञासापदस्य जिज्ञापयिषा परत्वात्, ननु प्रथममनुमान एव जिज्ञासेति न मूलवाक्याल्लभ्यते, अतआह–तथाचेति। भावोवाक्यार्थः। तथा हि उपमानपदस्योपमाननिरुपणे लक्षणयोपमाननिरुपण प्राक्कालीनत्वम्, पञ्च-म्यर्थं निवृत्तौ साप्रतियोगितयाजिज्ञासायामन्वेति। जिज्ञासायां पञ्चम्याजि-ज्ञासात्वेन शक्तिः अथ वा इच्छायां ज्ञानत्वेन च ज्ञाने पञ्चम्याः शक्तिः, इच्छायां च विषयतया ज्ञानस्यान्वयः।

अतएव जिज्ञापयिषा साधारणज्ञानेच्छामात्रलाभः। जिज्ञापयिषायाश्च जनकतया पञ्चम्यर्थेज्ञाने बहुवादि सम्मतत्व पदार्थ—

(दी०) वैयर्थ्यशङ्कानवकाशाच्चेति। लिङ्गस्य नित्यत्वेऽप्यनुमिति-करणस्य स्वरुपतः प्रत्यक्षोपजीवकत्वं व्यवस्थापयन्नाह - तच्चेति। अनुमिते र्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्ष मितिमध्यनिवेशे तत्करणस्यापि प्रत्यक्ष प्रमाणान्त-र्भावः स्यादिति तन्निरस्यति तच्चेति। इत्यपि केचित्।

अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुत्थापयति, अ ति।

(गो० टी०) न प्रकरितयाऽन्वितेऽन्वयः। सम्मतत्वस्य बलवदनिष्ठाननुबन्धीष्टसाधनमतिविषयत्वपर्यवसितस्य ज्ञाने जिज्ञापयिषा जनकत्वे न बाधः, तस्यज्ञानस्य विशेष्यसाकांक्षतया अनुमाने विशेष्यतासंसर्गेणान्वयः।

अथ वा अनुमानपदार्थ विशेषितं विषयतयेच्छाया नन्वेतीत्यनुमान जिज्ञापयिषा निवृत्तौ निरुपणीयत्वमुपमानस्य वाक्यादेव प्रतीयत इतिभावः। अत एव सङ्गतिं प्रदर्शयतीत्येव मवतारितम्। ननु सूचयतीति।

ननु जिज्ञापयिषा निवृत्तौ सत्या न्निरुपणीर्थयत्वन्न सङ्गतिः किमनुमानानन्तर निरूपणीये इति जिज्ञासाया उपमाननिरुपण प्रयोजकत्वे तानुमानं जिज्ञापयिषावगमस्य, तादृशजिज्ञासा च नियतत्वाभावादत आह—यथाचेति। अयंभावः अनन्तर निरुपणीयत्वमेव सङ्गतिः, उपमानात्प्रागनुमानं निरुप्य इतिवाक्यारब्धप्रायम्।

पञ्चम्यर्थ जिज्ञासा निवृत्ताविव अनुमाननिरुपणेप्युपमाननिरुपण प्राक्कालीनत्वस्य पृथगन्वया म्युपगमात्। अथानुमानजिज्ञासापगमदर्शन न्तु तस्यावसरत्वलाभाय, अनन्तरनिरुप्यत्वं हि प्रतिबन्धक जिज्ञासापगमं विशेषितम्। प्रसङ्गमध्येऽन्तर्भवति, पञ्चसङ्गति विभाजकोपाधिभिन्न सङ्गतित्वप्रयोजकरुपवतएव प्रसङ्गात्। तदेव सङ्गतित्वाप्रयोजकेनापि जिज्ञासापगमेन विशेषितमवसरपदार्थः।

नहि सङ्गतित्वघटकधर्मएवावसरादिशब्दानां प्रवृत्तिनिमित्तमिति नियमेमानमस्ति। तथा च स्वरुपसत्या अनुमान जिज्ञासानिवृत्या विशिष्टमनुमान निरुपणानन्तर निरुपणीयत्व मवसरपदार्थः। तत्र जिज्ञासापगमांशः सङ्गतित्वाप्रयोजकोपि अवसरपद प्रवृत्तावुपयुज्यत इतिदिक्।

(चि०) अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याऽभाव—निश्चयेऽप्ययोग्योपाधि शङ्कया व्यभिचारसंशयाच्छतशः सहचारितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन चप्र ामाण्याभिमानादिति नाप्रत्यक्षंप्रमाणमिति। न। अप्रमाण साधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्वात्, तयोश्च परकीययो रप्रत्यक्षत्वात्, अनुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च।

(दी०) 'अनुमानम्' अनुमानत्वेनाभिमतं धूमादिज्ञानम्, असत्ख्याति उपनीतमनुमानमेव वा, 'संवादेन' संवादाभिमानेन, सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्र — साक्षिणाध्यक्षेणानुल्लेखादध्यक्षमूलक विकल्पोल्लिखितत्वाद्वा संवादः, अनुमान प्रामाण्ये च तन्मूलकसमय निर्णयाद्यधीन प्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रामाण्यान्ना प्रत्यक्षं प्रमाणमित्याह— इतीत्यादि ।

(गो० टी०) सार्वभौममत मुत्थापयति शब्दान्तरेति । गवादि शब्देत्यर्थः । तथा च गो सदृशोगवयपदवाच्य इत्यतिदेश वाक्यजन्य वाक्यार्थबोधस्य स्मृतिद्वारोपमितिकरणस्य गोपदशक्ति ग्राहकानुमानोपजीवकत्वमितिभावः ।

गवयपदस्य गवयपदवाच्यत्व विशिष्टे लक्षणाग्राहकत्वेनापि अनुमानोपयोगमाह सप्रवृत्तीति । किञ्चिद्धर्मविशिष्टबोधकजनकत्वेन सङ्केतितम्, गवयपदमित्याकारकमनुमानं किञ्चिद्रूपावच्छिन्नगवयपदजन्यबोधविषयत्वेन सङ्केतितत्वमपि अर्थे गृहणाति, तदेव च वाक्यत्व तद्विशिष्टे गवयलक्षणाग्रहाधीनमुपमानमितिभावः ।

सादृश्य विशिष्ट पिण्डप्रत्यक्षस्योपमानत्वे तथाप्यनुमानोपजीवकत्वाभिप्रायेणाह अन्ततइति । दृष्टद्वारा सम्भवेपि इत्यर्थः । अदृष्टद्वारानुमानस्यापि क्वचिदुपमानस्योपजीवकत्व सम्भवादाह— निखिलमिति । तथा च निरुपणीयतावच्छेदक प्रमाणत्वावान्तरधर्मावच्छेदेनोपजीवकत्वमेव सङ्गतिरित्यमिप्राय इति संप्रदायः ।

(दी०) 'अप्रमाणसाधर्म्येण' प्रमाणताप्रयोजकरूपशून्यत्वेन, 'दृष्टसाधर्म्यस्य' साधर्म्यदर्शनस्य वा । नन्वभिहितमेवसाधर्म्यदर्शनं सम्भावनां भावयति संभावनैव च बहुशो व्यवहारहेतुरित्यतआह - 'अनुमानमिति' ।

ननु न वयमापाततो भ्रमजन्यत्वलक्षणमप्रामाण्यं निरुपयामो येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं संभाव्येतापि परन्तु प्रमाकरणत्वव्यातिरेक आह% अपिचेति ।

(गो० टी०) सनयुक्तः अनादौ संसारेसर्वेषा मनुमानानामदृष्ट प्रयोजक-शक्तिग्रहोपयिकोपमानोपजीवकत्व संभवादीश्वरज्ञानस्यानुमानत्वे तूपमानत्व-स्यापि संभवात्। वस्तुतो निखिलमिति सादृश्यपिण्डप्रत्यक्षस्वरुपमतिदेश वाक्यार्थबोध स्वरुपं वा भवतूपमानम्।

उभयथाप्यनुमानोपजीवकत्वमिति सूचयितुमुक्तम्। केचिदिति। उपजी-वकत्वं सङ्गतिर्न्न वहुवादिसम्मतत्वेन सूचयितुं शक्यत इत्यस्वरसः। वस्तुतो अथोपमान —

(चि०) अपिचानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणतापत्तेः। व्याप्ति-ग्रहोपायश्च वक्ष्यते।

(दी०) स्वतइति। न चानुगताकारा संस्पर्शिनि परमार्थ सत्स्वलक्षण साक्षिणि स्वसंवेदनसंविदित प्रमाण्ये निर्विकल्पकज्ञानेनाप्रामाण्यं संदिह्यते परन्तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पक एवेतिवाच्यम्, निर्विकल्पकस्य सन्मात्रावलम्वनस्य स्वविषयत्वप्रामाण्यावगाहित्वानामनुमा-नाधीन सिद्धिकत्वात्। सर्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न संभ-वत्युपायाभावादित्यत आह – व्याप्तीति।

(गो० टी०) निरुप्यत इत्यत्राथ शब्द सूचनीयासङ्गतिरेव सार्वभौमैरुपद-र्शिता, इह वहुवादि सम्मतत्वोक्त्या अनुमानभिन्नत्वेनोपमाननिरुपणस्यानुमान निरुपण सापेक्षत्वेन निरुपण पौर्वापर्य नियामकमेव सूचितमिति नकाप्यनुपपत्ति-रिति ध्येयम्। सङ्गते रनन्तराभिधानव्याप्यत्वाभावेऽपि प्रत्यक्षानुमान निरुप-णयोः पौर्वापर्यक्रमनियामकं मूलादुद्धरति चेति इह मौनवाक्येबोध्यत्वं सप्तम्यर्थः निरुपणयो निरूप्यार्थफलयो र्वाक्यार्थवोधयोः तथा च प्रत्यक्षपदं प्रत्यक्षनिरूपण-परम्। निरूपणं शाब्दबोधजनको व्यापार इति निरूपणयोरुपजीव्योप जीव्यक भावा संभवा न्निरूपण फलयोरेव तत्पर्यवस्यति, फलपौर्वापर्यायित्तु च निरूपणे पौर्वापर्यमिति भावः।

अनुमानत्वेनानुमाननिरूपणन्न प्रत्यक्षनिरूपणाधीनमत आह अथेत्यदि। अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं चेति सूत्र येन खण्ड च क्षुषा ऽनुमितिमात्रोपधायक एव परामर्शो जनितः तदिन्द्रिय व्यक्तिवाचकं तत्पदम्

तथा च तदिन्द्रिय व्यक्तिजनित साक्षात्कारजन्य प्रमिति वृत्यनभवत्वावान्तर-जातिमज्ज्ञानकरणत्वमित्यानुमानलक्षणम् तत्पूर्वकमितित्रिविधमित्यादिको विभागः पूर्ववत्कारणलिङ्गकम्। एवं च प्रत्यक्षफलस्वरूपोभयघटित धर्म्मेणा-मुमानफलस्वरूपयोः सौत्रनिरूपणमेवप्रकृते निरूपयतेरर्थस्तत्र प्रत्यक्ष निरूपणोप-जीवकत्वान्वयोनानुपपन्न इति भावः। प्रत्यक्षपूर्वकत्वेन प्रत्यक्षपूर्वज्ञानकरण-त्वेन तच्छब्देनेति प्रत्यक्षपदमिन्द्रियसाक्षात्कारे च वर्तते निरूपयतिना सौत्र सिरूपणस्याभिधानेनिरूप्यतइति वर्त्तमानप्रयत्न साध्यतावोधकपद मनुपपन्न इत्यतआह—अत्रापीति।

सहचारदर्शनजन्यत्वेन व्याप्तिग्रहस्य निरूपणमिन्द्रियसाक्षात्कारोभय निरूपणाप्रत्यक्षं दर्शनपदस्येन्द्रियजन्यज्ञानार्थकत्वादिति मौलनिरूपणमेवात्रनिरू-पयतेरर्थ इतिभावः। एवं च प्रत्यक्षोपजीवकत्वादितिहेतावेव पञ्चमी, यय्य-द्युपजीवकं तत्तदनन्तरमिति व्याप्तेः प्रत्यक्षपदद्वयञ्च तन्निरूपणपरमिति-ध्येयम्। अनुमानोपमाननिरूपण पौर्वापर्यनियामकमप्यत्रैवतिदिशाति एव-अत्रवहुवादीत्यस्योपमाननिरूपणोप जीव्यत्वेनसकलवादिसिद्धत्वादित्यर्थ इति ध्येयम्। अनुमानोपमान निरूपण पौर्वापर्य नियामक यप्यत्रैवातिदिषति—एव-मिति। अत्रवहुवादीत्यस्योपमाननिरूपणोपजीव्यत्वेन एकलवाति सिद्धत्वा दित्यर्थ इतिध्येयम्।

मिश्रास्तु उपमानशब्दयोरिवार्थानुमानंनिरूप्यत इत्येवानुमानेपि प्रतिज्ञार्थ-शब्देनान्तर्यवाचिना- प्रत्यक्षानुमाननिरूपणयोः सिद्धत्व साध्यत्व सिद्धो सिद्धि-साध्यसममिव्याहारे सिद्धं साध्याय कल्प्यत इतिन्यायेन कार्यकारणभावलाभे निरूपणयो स्तद्बाधात् प्रत्यक्षानुमानयोरेव पर्यवस्यतीति निरर्थकंपाठान्तरकल्पन-मितिप्राहुः।

★ इति ★

म० म० श्री गोकुलनाथोपाध्याय विरचितः
अनुमिति दीधिति विद्योतः समाप्तः।

शुद्धाशुद्धपत्रम्

पृ०	पं०	अशुद्ध	शुद्ध
२	४	दीधितिम्	दीधिति
४	१	फलवत्भिन्ने	फलवद्भिन्ने
,,	१८	सन्तायां	सन्तायाम्
,,	२८	अतिमृत्यिति	अतिमृत्यिवति
६	१	शब्दंप्रत्यसमवायि	शब्दंप्रतिसमवायि
६	७	मनस्त्वयोग	मनःसंयोग
,,	१३	तेनद्व्यणुकोपादानकेन द्व्यणकोपादानदर्शिति इति	तेन द्व्यणुकोपादानदर्शिनः
,,	१९	प्रकृतेपिण्डज्ञानादौ	ग्राहितेनित्यज्ञानादौ
,,	२०	किमनो	किमतो
,,	२४	ताकार्य	कार्यता
७	२	सिद्धयतु	तावज्जन्यतावच्छेदिका धर्मत्वावान्तरजातिः सिद्ध्यतु
७	७	तादात्म्येनपूर्वस्य	तादात्म्येनापूर्वस्य
७	९	प्रतियोत्वेना	प्रतियोगित्वेना
७	१०	भोगेषु	भोगेन
७	१७	फलम्दृष्टं	फलमदृष्टं
७	१९	विष्यि	विशिष्य
७	२३	चांशिकभेदः	चांशिक कर्तृत्वभेदेन
८	५	तन्यत्वेन	तुल्यत्वेन

पृ०	पं०	अशुद्ध	शुद्ध
८	१७	नित्यु	नित्य
८	२६	शङ्गा	शङ्का
८	२२	त।या	भाया
९	१	ममणा	मणा
१०	९	स्यानुगमे	स्यानवगमे
१०	१२	अमिष्ट	अनिष्ट
१०	१३	प्रत्क्ष	प्रन्यक्ष
१०	१५	लिड्र्थो	लिङ्र्घो
१०	१९	निरूयण	निरूपण
१०	२४	गुरूवरामा	गुरूवचना
११	२	यम । वेति	यमवेति
११	४	फलमिति । यथा	फलमितियथा
११	५	चस	वस
११	६	शतगुण	शतुर्गुण
११	१५	जाता	जाना
१२	१	त्रानुदित:	त्रानूदित:
१२	२	म आपातत:	स आपातत:
१२	३	तत्वभेदो	तद्‌भेदो
१२	७	सम्भवाविकृत	सम्भवाद्‌विकृत
१२	८	षुन	पुन
१२	१०	खुरत्व	शब्दत्व
१२	१५	प्रकृतेपि	प्रकृते
१२	१६	पदस्यार्थ: । सक्षा	पदस्यार्थ: साक्षा
१२	२६	पूर्वा	सर्वा
१३	१	जिज्ञासाया	जिज्ञासया
१३	१५	अथच	अथवा
१३	१९	दुर्गहत्वात्	दुर्ग्रहत्वात

पृ०	पं०	अशुद्ध	शुद्ध
१३	२७	वाक्ये	वाच्ये
१४	१	अनिमित्युपेत्यादिग्रहः इत्यन्तस्थाने	अनुमित्युप नीतार्थगोचर चाक्षुपाद्यु पग्रहः
१४	२	सर्वेति	सर्वेति
१४	६	वहुवादिनो	वहुवचनो
१४	८	पन्न वेत्य	पर्न्न वेत्य
१४	११	कत्वेविशेप	कत्वविशेपे
१४	११	पञ्चम्या	पञ्चम्य
१४	१६	ताश्च	तायाश्च
१४	१७	ञ्चेदानीं	शक्त्यादीनां
१५	१	व्याभि	व्यभि
१५	४	धर्मत्व	धर्मानु
१५	६	मनसः	मनस्य
१५	१२	प्रयुक्तोम	प्रयुक्तोत्पत्तिम
१५	१५	करणत्वम्।	करणत्वम्
१५	१६	मनसिऽ	मनस्य
१६	२	कारणता	करणता
१६	२	कारणत्वा	करणत्वा
१६	३	रूपार्थ	पदार्थ
६६	५	सार्वज्ञो	सार्वज्ञयो
१६	६	श्व	स्व
१६	७	धानष्य	धानस्य
१६	१२	चक्षुर्स	चक्षुर्म
१६	१२	नैक	नैक
१६	१५	गौरवात्।	गौरवात्
१६	२०	जन्यो	जन्ये
१६	२२	कर्तव्यार्थम	कर्त्तव्यत्वानुमि

पृ०	पं०	अशुद्ध	शुद्ध
१६	२२	कायापि	काया अपि
१७	१	मिथ्य	मित्थ
१७	५	त्वेव	त्वेनैव
१७	५	जनकत्वं	जनकं
१७	६	श्रोत्र	श्रौत्र
१७	७	सङ्गतेव	सङ्गतेर
१७	६	मासङ्कते	आसङ्कते
१७	१०	निरूप्यसंयागे	निरूप्य
१७	२०	सङ्गताथैकत्वाज्	सङ्गतार्थकत्वा
१७	२२	त्यध	त्यर्ध
१७	२३	दिकौ	दिको
१७	२६	तत्तात्वा	तत्तात्वा
१७	२६	स्थानविशेषात्म	स्थानसंयोगविशेषात्
१७	२६	प्रयत्नात्म	प्रयत्नात्स
१७	२८	स्थिति	स्थितिः
१७	२८	किमशब्दस्यो	किमस्यो
१७	२८	जीवक	जीवकमिति
१८	३	वन्धितत्वेन	वन्धित्वेन
१८	३	जिज्ञासात्	जिज्ञासात
१८	५	कत्वेन	कत्वे
१८	१०	भिद्मते	भिद्यते
१८	१०	किंप्रत्यक्षो	नतु प्रत्यक्षो
१८	११	निरूपते	निरूप्यत इति
१८	१३	यत्प	नत्पु
१८	१५	विशेषणम् ।	विशेषणम्
१८	१७	गुणत्य	गुणत्व
१८	१[illegible]	[illegible]यस्तत्वेन	[illegible]पर्यत्वेन

पृ०	पं०	अशुद्ध	शुद्ध
१८	१६	पुरूण	पुरूष
१८	२०	सुज्ञानेच्छा	स्वज्ञानेच्छा
१८	२०	तस्याऽ	तस्या अ
१८	२२	धनताज्ञाना	धनताज्ञानाभावा
१६	३	तादृशमु	तादृशीमु
१६	६	जिज्ञासापयिषा	जिज्ञापयिषा
१६	८	प्रष्टु	प्रष्टृ
१६	६	जन्यव	जन्यत
१६	११	भावस	भावम
१६	१२	जिज्ञासा	जिज्ञासां
१६	१३	प्रष्टि	प्रष्टृ
१६	१३	इति । न	इतिन
१६	१४	प्रष्णो	प्रश्नो
१६	२२	जिर्ज्ञसागभा	जिज्ञासागर्भ
१६	२३	निवर्तयोद्व	निवर्त्तकत्वयोर्द्व
१६	२४	जीवक	जीवकं
१६	२५	नन्नरा	नन्तरा
२०	२	निरूपणम् ।	निरूपणम्
२०	६	सन्धायै ।	सन्धायै
२०	११	भवत	भवतु
२०	१३	फलमुद्दे श्यत्वम	फलत्वमुद्दे श्यत्वम्
२०	१४	च्छामित्य	च्छामीत्य
२०	१४	नन्तर्मावन	नन्तर्भावेन
२०	१८	द्वेषास	द्वेषात्स
२०	२६	जिज्ञासाथाऽ	जिज्ञासाया अ
२१	१६	कृतत्या	कृत्या
२१	१७	नाम	ना

पृ०	पं०	अशुद्ध	शुद्ध
२१	१८	जिज्ञास्य	जिज्ञासा
२१	१८	पञ्चम्यत्वबोधा	पञ्चम्यनुरोधा
२१	२३	जिज्ञासाया	जिज्ञासया
२१	२६	परस्परा	परम्परा
२२	६	भूततेति	भूतेति
२२	१०	सङ्गस्तु	सङ्गतिस्तत्र
२२	११	एकवाक्यता,	एकवाक्यता
२२	१४	वाक्यम् नतु	नतु वाक्यं
२२	२७	स्वीकारान्तन	स्वीकारात्तेन
२३	५	तर्त्थस्य	तदर्थस्य
२३	५	मन्वयसम्भवात्	मन्वयः सम्भवति
२३	५	रपदार्थत्वात्	अपदार्थत्वात्
२३	५	पदाथत्वे	पदार्थत्वे
२३	६	न नाम्ना पदार्थ सङ्कीर्त्तन मुद्देशः	न
२४	६	न्व येति	नेति
२४	८	जिज्ञासाया	जिज्ञासायां
२५	१४	ज्ञानंजन्य	ज्ञानजन्य
२५	१६	द्रयस्व	द्वयस्य
२५	१६	भिधेयं	वधेयम्
२६	८	परितज्य	परित्यज्य
,,	१०	मिश्रः	मिश्रैः
,,	२३	जन्यज्ञनम	जन्यज्ञानम्
२७	८	भावान्या	भवान्या
,,	१४	पक्षताता	पक्षतायाः
२८	१	स्वप्रति	सुप्रति
,,	२	प्रतिपत्तक	प्रतिपत्तिक